नस्यचाज्ञानमेवमूलमित्याह ज्ञानमेवेति अत्र विधौ संसारनिवृत्तिलक्षणे निवृत्तिलक्षणे कर्त्तव्येऽर्थे न[illegible]नमेव मूलकारणत्वात् ज्ञानहीनमे
व विधीयते साधनत्वेनेति शेषः ननु कर्मैव तन्नाशकमस्तु किं ज्ञानेनेत्याशंक्याह विद्येवतानमेवतन्नाशविधौ मूलाज्ञाननाशजनने पटीय
सी समर्था न कर्म समर्थमिति शेषः यतस्तत्र ज्ञे अज्ञानजे आत्मस्वरूपाज्ञानजन्ये देहाद्यभिमानजन्यत्वात्कर्मणो ज्ञानजन्यत्वं यो ध्वंसं
नु तज्जन्यस्यापि तन्नाशकत्वं दृष्टमग्निकर्कघादौ दृष्टमित्याशंक्य तज्जन्यत्वं वा तन्नाशकत्वे प्रयोजकं किंतु सविरोधत्वमेवेत्याह यत्सविरोधं
न हीरितं नाशकमुक्तमित्यर्थः ८ अत एकेव मे कर्मणा नाज्ञानहानिरित्याह नाज्ञानेत्यादि यतः कर्मणा विरोधाभावान्नाज्ञानेनाशो नापि
ग नाशो न स्ततः कर्म तु हानात् पुनः पुनः सहोत्थशुभफलत्वात् देहेषु विशिष्टं कर्मैवोद्भवेत् कर्मणाश्च पुनः संसार एवेति ननु किं भक्त्या ज्ञानतत्त्वस्मा
द्बुधो विवेकी ज्ञानविचारवान् स्यात तेन नेति ज्ञानं वेदांतवाक्यं तद्विचारवान् भवेत् १० इहानीं ज्ञानस्यैव मोक्षहेतुत्वे वक्तुं ज्ञानकर्मसमुच्चयवादं दूषय

अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितं ९ नाज्ञानहा
निर्न च रागसंक्षयो भवेत्ततः कर्म सदोषमुद्भवेत् ततः पुनः संसृतिरप्यवारिता तस्माद्बुधो ज्ञानविचारवान्भवेत् १० ननु क्रिया वेद
मुखेन चोदिता यथैव विद्या पुरुषार्थसाधनं कर्त्तव्यता प्राणभृतः प्रचोदिता विद्यासहायत्वमुपैति सा पुनः ११ कर्माकृतौ
दोषमपि श्रुतिर्जगौ तस्मात्सदा कार्यमिदं मुमुक्षुणा ननु स्वतंत्रा ध्रुवकार्यकारिणी विद्या न किंचिन्मनसाप्यपेक्षते १२

यानुवदति सार्धेन नन्विति शंकायां यथा विद्या वेदमुखेन श्रुतिस्मृतिपुराणलक्षणेन ब्रह्मविदाप्नोति परमित्यादिना पुरुषार्थसाधनमु
क्ता तथाऽभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतमित्यादिना क्रियापि तत्साधनत्वेनोक्ता
किंच क्रियाकर्तव्यतात ती र्यार्थे प्रथमा कर्तव्यतया आवश्यकत्वेना आवश्यकर्तव्यतया प्रचोदितानि त्यनैमित्तिकरूपा एवं च तद
करणे प्रत्यवायोत्पत्त्या ज्ञानोत्पत्तिरेव न स्यात्तस्मात्सा पुनर्विद्यायाः सहायत्वं प्राप्नोति घटे जननीये यथा दंडचक्रादीनां परस्परं सह
यता ११ कर्तव्यतेति श्लोकमेव विवृणोति कर्मेति व्रीहवा एव देवानामयोग्निमुपासयते यावज्जीवमग्निहोत्रं जुहोतीति श्रुतिः तत्र सिद्धां
तीषाकते तन्वितिध्रुवां स्थिरं कार्यं परं पुरुषार्थं मोक्षजनिकं विद्या यतः स्वतंत्रा विनापि सहायेन स्वकार्यसंपादने समर्थो तेजसि मिरति
र्चनेन समर्थमनसापि किंचित्सहायमन्तव्यस्तु नायेक्षते तत्त्वापफलजननीये सहायांतरसंभावनापि नेति भावः अनेन विद्याफलजनने तिरपे
य

समुच्चयवादीपरिहरति नेतित्यादिना। नेत्यर्थः सत्यकार्यः अथ यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिवेदेन बोधितास्थिरकार्योपि अध्वरः यथा
स्थानपिकारकादिकान् आराद्उपकारप्रयाजानुयाजादीनिरे प्रकालादीनिव काश्यते तथा विद्यापि अग्निहोत्रं जुहोतीत्यादिविधिवाक्यजनितसम
हेनप्रकाशितैः कर्मभिः सहितैव मुक्तये विशिष्यत इत्यर्थः विद्याफलदाने कर्मापेक्षा अंगित्वात् प्रयाजाद्यंगापेक्षदर्शादिवदिति सत्रातिपेक्षा
नुमानं मनेन सूचितं १३ तदनुपसिद्धान्ती दूषयति केचिदिति यत्केचिदितर्कवादिन इति ज्ञानकर्मणी समुच्चित्य मुक्तिसाधनत्वं वदंति तदयुक्तम्
यथा केवलं कर्म मोक्षसाधनमित्यसत् तथा तन्मिलितमप्यसत् तत्र हेतुरुदृष्टविरोधकारणात् दृष्टो यो विरोधः स रूपात्कारणात्तरे सहित्यर्थः विरोधमेवाह दे
हाभिमानात् क्रिया वर्धते अनात्मनि देहादावात्मत्वाभिमानात् क्रियावृद्धिः विद्यानुगताहंकृतितः गताहंकृतिर्यस्मात् स्वनष्टाहंकृतेः प्रसिध्यति

नसत्यकार्योपि हि यद्वदध्वरः प्रकांक्षतेन्यानपि कारकादिकान् तथैव विद्या विधितः प्रकाशितैर्विशिष्यते कर्मभिरेव मुक्तये १३ के
चिद्वदंतीति वितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् देहाभिमानादभिवर्धते क्रिया विद्यागताहंकृतितः प्रसिध्यति १४
विशुद्धविज्ञानविरोचनांचिता विद्यात्मवृत्तिश्चरमेतिभण्यते उदेति कर्माखिलकारकादिभिर्निहंति विद्याखिलकारकादिकं १५

सर्वाविमक्तिकास्तसिः एवं चाहंकारसत्तामूलकत्वात् क्रियाज्ञानयोः समुच्चयो विरुद्ध इत्यर्थः १४ अथ पूर्वपक्षयुक्तानुमाने दूषयन् विद्या
स्वरूपमाह विशुद्धेति विशुद्धं विज्ञानं येभ्यस्तेषां वेदांतवाक्यानां यद्विशेषेणारोचनं तत्त्वयोरभेदावलोचनं विचारस्तेनांचिता प्रापिता
या चरमा आत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः सा विद्येति भण्यते विद्वद्भिरिति शेषः पुनः समुच्चयवारणाय विद्याकर्मणोर्वैषम्यमाह क
र्म यज्ञादि अखिलकारकादिभिः कर्तृकर्मादिभिरंगैः सह हितं सत् उदेति फलायोन्मुखं भवति विद्या पुनरखिलकारकादि निहंति तत्र कर्तृत्वा
दिबुद्धिं निहंति सकलव्यापारपरित्यागेन ब्रह्मणि समाप्तिर्हि विद्या अतः साचोत्पन्नौ चित्तशुद्धिद्वारा कर्मसापेक्षा स्वफले ज्ञानयितव्येत
त्रिरये क्षैव अन्यथा विद्यास्वरूपस्यैव भंगापत्तेरिति पूर्वपक्षयुक्तानुमाने हेतोरसिद्धिरिति भावः १५ ॥ छ ॥ छ ॥

आ०प्र० २

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधात् विद्यायाः कर्मणा सह विरोधेन समुच्चयो न भवेत्तस्मात् सुधीर्मुमुक्षुरशेषतः कर्म त्यजेत्
तत्काम्यं तु सर्वथा त्याज्यमेव नित्यनैमित्तिकं यावच्चित्तशुद्धि कर्तव्यमेव ततोपि चित्तशुद्धिलाभे चित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसंधानप्रतिबंधक
त्वात्प्रयोजनाभावाच्च तत्त्यक्त्वा त्याज्यमेवेति भावः इदानीं मुमुक्षोः कर्तव्यमाह निवृत्ताः सर्वेभ्य इन्द्रियाणां गोचरा विषयाः शब्दादयो यस्मात्तादृशः
सन् आत्मनः सच्चिदानन्दस्यानुसंधाने एव परमनयं प्राप्य स्यात् तथाविधो भवेत् अत्रेन्द्रियप्रत्याहारः कर्तव्यत्वेनोक्तः ततः श्रवणप्राणायामाद्य
र्थोऽस्तिस्म १६ रागविरागिभेदेन कर्मणां कर्तव्यता कर्तव्यतेत्याह यावदिति मायया विद्यया शरीरादिषु तावदात्मधीरहंकर्तृत्वादिरूपा
पावद्वर्तते तावद्विधिवादकर्मणां विधिर्यज्ञेतेत्यादिश्रुतिवाक्यकर्तव्यतावोधकोये वाक्य कर्मणां विधेयो वशवर्तीति कर्ता भवेत्ततः श्रवणमननादि

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्न समुच्चयो भवेत् आत्मानुसंधानपरायणः सदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६
यावच्छरीरादिषु माययात्मधीस्तावद्विधेयो विधिवादकर्मणां नेतीति वाक्यैरखिलं निषिध्य तत् ज्ञात्वा परात्मानमथ त्यजेत्क्रियाः
१७ यदा परात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभाति भास्वरं तदैव माया प्रविलीयतेऽञ्जसा सकारका कारणमात्मसंसृतेः १८

मेद की

खिलं जगत् नेति नेतीति वाक्यैः अथात आदेशो नेति नेतीत्यादिवाक्यैर्निषिध्य मिथ्यात्वेन निर्णीय तद्विलक्षणं गतया सत्यत्वेन परात्मस्वरू
पं ज्ञात्वा क्रियास्त्यजेदिति रूपितमेतत् १७ आत्मविज्ञानेन सस्य बहुफलं विद्यानिवर्तनं स्याह यदेति आत्मनि गुणोतः करणोपरीत्य नश्वरा
त्मात्मनो जीवस्य च यो विभेदो मायातः कारणरूपोपाधिद्वयकृतो विभेदो भेदस्तस्य भेदकं नाशकं भास्वरं प्रकाशशीलं यद्विज्ञानं तदर
स्वाप्तममर्द नश्वरं कं ब्रह्माकाराः खंडा वृत्तिर्यदा भाति असंभावनादि तिरस्कारे रागद्वेषितैरेव सकारका ज्ञानांतरप्राप्तकर्मसहिता या तत
जीवोपाधिभूता विद्यांजसा सद्य इति विलीयते न श्यति ननु तन्नाशेपि संसारनाशः कथं ततो माया विशेषणं आत्मसंसृतेः कारणं संसा
रस्योपादानकारणमेवं च तन्नाशे कार्यनाशो भवत्येवेति भावः १८

उक्तमेवार्थं पुनर्वैशद्यायाह अक्षतीति तत्त्वमसीत्यादिश्रुतिरूपैः प्रमाणैः समुत्पन्नेन ज्ञानेन नाशिता सा अविद्या कथमपि कार्यकारिणी भविष्यति का कु
त्रसर्वथा नेत्यर्थः अस्मतः कार्यकारित्वासंभवादिति भावः पुनस्तस्मान्नोद्भवेदित्याह विज्ञानमात्रादिति अमलाद्द्वितीयतः शुद्धाद्वितीयात्मविषयक
विज्ञानमात्रादितरो सहकृतात्त्रिविधात्मन परिपाकजातं ज्ञानाद्यतो न द्वातस्मात्सा पुनर्न भविष्यति रज्ज्वज्ञानमूलकसर्पस्पर्शज्ञानेन निवृत्तस्य य
था न पुनरुत्पत्तिरिति भावः १९ विद्याया इतरनिरपेक्षाया एव मोक्षकारणत्वमुक्तं युक्तिपूर्वकं पुनः कथयति यतस्तदा [illegible] यदि न द्वातत्त्वं ज्ञा
नेन नाशिता तामा न पुनः प्रसूयते नोत्पद्यते तदाकाररताभावादाह हे मतिः कथं भवेत्क अथमपि न भवेदित्यर्थः तदभावाज्ज्ञातत्वात् केवलमभाव इति स्व पूलजननेसाध्यते
त्रा इतरनिरपेक्षैव नाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवला सहायैव विमोक्षाय विभातितत्फलिका भवतीत्यर्थः २० अत्रार्थे श्रुतिरपि प्रमाणमि
त्याह सेति सा प्रसिद्धा न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादिका श्रुतिः । यथा श्रुतिः प्रशस्तानां मध्ये वारैः प्राशस्तेन बोधिता नाम विक

वि १ श्रुतिप्रमाणाभिर्नाशिता सा कथं भविष्यत्यपि कार्य[illegible]कारिणी विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्या न पुनर्भविष्यति १९
यदि स्म न ह्वा नु पुनः प्रसूयते कर्त्ताहमस्येति मतिः कथं भवेत् तस्मात्स्वतंत्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला २० सा तैत्ति
रीयश्रुतिराह सादरं न्यासं प्रशस्ताखिलकर्मणां स्फुटं एतावदित्याह च वाजिनां श्रुतिर्ज्ञानं विमोक्षाय न कर्म साधनं २१ विद्यासमत्वेन
तु दर्शितस्त्वया क्रतुर्न दृष्टान्त उदाहृतः समः फलैः पृथक्त्वाद्बहुकारकैः क्रतुः संसाध्यते ज्ञानमतो विपर्ययं २२ ॥ ॥

मेरणां न्यासं त्यागं सादरं स्फुटमाह न तु कर्मसमुच्चयमित्यर्थः तथा वाजिनां वाजसनेयिनां एतावदरे खल्वमृतत्वमित्यादिका ज्ञानं विमोक्षाय साध
नं न कर्मेत्येतदाह २१ अहंकारतस्य रूपकारणादेव प्रमातृक्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमपि वैषम्यमाह विद्येति हे समुच्चयवादिन्
त्वया क्रतुरग्निहोत्रादिर्विद्यासमत्वेन दर्शितः परं तु समो दृष्टान्तो नोदाहृतः अनेन क्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानं नि
रस्तं दृष्टान्ताभावात् अन्वयेनानुमानेन व्यतिरेकीति भावः एतेन व्याकरे विस्तरेण प्रपंचितेन तु विद्याकर्मणी समे एकफलत्वात् [illegible] इव इति स्मा
नमिति चेत्तत्राह फलैः पृथक्त्वात् बहुस्वर्गादि तयोर्याफलानां भेदादित्यर्थः एवं च स्वस्वरूपाप्तिर्द्वो हेतुरिति भावः समानुकारकत्वमपि हेतुर्नेत्याह
क्रतुर्बहुभिः कारकैः रहं ममताभिमानरूपैः रागद्वेषादिभिः अहं हे [illegible] कालादिभिरितियमे असाध्यते ज्ञानं तु ततो विपर्ययं वर्तते न तयोः साम्यमिति भावः

२२

नचकरणो ऽसमवायमिथ्याकर्मकार्यमितिचेन्नेत्याह समसमवाय इतिकर्मत्यागे हि नित्यं येनाहं असमवायसहितो भविष्यामीत्येवं शुद्धात्मनि स्वनात्मधर्म
स्याधीरस्य तत्वज्ञानविकलस्य प्रसिद्धं न तु तत्वदर्शिनः तस्माहं बुधैः २२ भावात पापादेरनात्मधर्मता निश्चयाद्यतस्माद्बुधैः कर्मक्रियात्मभिः खसर्थैतती
याक्रियाफलासक्तः चिन्ताना विधानतो विधानेनेतिकर्तव्यतया पुक्तं कर्मविधिभिरवश्यकर्तव्यतयाबोधितमपित्याज्यमित्यर्थः २३ अथ विरक्तस्यका
र्यमाह अद्वैतेति गुरुशास्त्रयोर्विश्वासः अज्ञातरन्वितो मुमुक्षुः शुद्धमानसोपि निष्कामकर्मानुष्ठाना[illegible]द्धमानसः श्रीगुरोः प्रसादाश्च श्रुतस्तत्वमसीति वाक
तः आत्मात्मजीवयोरैक्यात्म्यं विज्ञाय मननं निदिध्यासनपरिपाकाभ्यां साक्षात्कारस्य च एवार्थः साक्षात्कृत्यैवसुखी भवेत् सकलदुःखहीनो भवेदित्यर्थः
अप्रकंपनः विषयाभिलाषाक्षोभितान्तःकरणः २४ मूलवाक्यविवरीतुं वाक्यार्थस्य पदार्थस्य पूर्वार्थबोधपूर्वकत्वमाह आदाविति विधानतः ध्यानमाह
राहित्येन वाक्यार्थविज्ञानस्य विधावुक्तत्वेऽप्यादौ प्रथमं मुख्यमिति यावत् पदार्थावगतिः कारणं हि प्रसिद्धं तत्स्वपदत्रयं तत्वमसीति तत्त्वं तत्पदार्थः पर

समसमवायोऽहमित्युक्तात्माधीरस्य प्रसिद्धं न तु तत्वदर्शिनः तस्मात् बुधैः स्यात्ममपि क्रियात्मभिर्विधानतः कर्मविधिप्रकाशितं २३ अज्ञानान्वितस्य
त्वमसीति वाक्यतो गुरोः प्रसादाद्विशुद्धमानसः विज्ञायैकात्म्यमथात्मजीवयोस्सुखीभवेन्मेरुरिवाप्रकंपनः २४ आदौ पदार्थावगतिर्हि कार
णं वाक्यार्थविज्ञानविधौ विधानतः तत्वंपदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत् २५ प्रत्यक्परोक्षादिविरोधमात्मनोर्वि
हाय संगृह्य तयोश्चिदात्मतां संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् २६

मात्मा सर्वज्ञत्वादिगुणः त्वंपदार्थो जीवः अनयोस्तत्वंपदार्थयोरैक्यात्म्यं बोधकमसीतिपदं २५ ननु सर्वज्ञत्वादिगुणस्येशस्य किंचिज्ज्ञत्
त्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशंक्याह प्रत्यगिति अहं बुद्धिवेद्यत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मरूपं मात्मनोः पर
मात्मजीवात्मनोर्विरोधं विहाय प्रत्यक्त्वं तयोः संशोधितां शुद्धिं भिः सम्यग्विचारितां तत्वंपदाभ्यां शक्ताभावे पि वस्तुमाराप्रकारया लक्षणा
यालक्षितां ज्ञातां चिदात्मतां संगृह्य तत्वंपदे तोपस्थिति विषयां कृत्वा स्वमात्मानं तथा ज्ञात्वा [illegible] ऐक्यं ज्ञात्वा ज्ञानेन तदन्यद्वयो भवेत् चित्स्व
रूपतां प्राप्तस्स्वयं भवेत् सर्वमपि तत्वरूपं एव विस्मृतकंठचामीकरन्यायेन च तत्त्वमसि इति तत्त्वेतिउक्तं अयं भावः तत्वंपदयोर्वाच्यार्थौ वाच्यलक्ष्य
आतत्त्वतस्य स्वमायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किंचिज्ज्ञत्वादिविशिष्टो ऽविद्योपाधिरविद्याविद्यान्तःकरणो
पाधिर्वाच्यः उभयोरपिविशिष्टयोरंशयोस्त्यागे नशुद्धचिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेपि लक्ष्ययोरैक्यं निर्बाधमेवेति २६

त्म्य ४
च्योः २

अ॰उ॰त॰ १६

उक्तो लक्षणास्वरूपमाह एकात्मकत्वादिति जहतीलक्षणा जहत्स्वार्थलक्षणा यथा गंगायां घोष इत्यत्र गंगापदार्थस्य प्रवाहस्य घोषाधारतानुपपत्त्या सर्व
थात्स्वार्थत्यागेन तीररूपार्थलक्षणा सा प्रकृते न एकात्मकत्वात् विशेष्यांशस्यैकत्वात् सर्वथा स्वार्थत्यागाभावात् न वाऽजहल्लक्षणाऽजहत्स्वार्थल
क्षणावत्त्वमपि अत्र न सम्भवति यथा काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य स्वार्थात्यागेनैव दध्युपघातके लक्षणा सापि न विरोधतः विशेषणत्या
गेन सर्वथा स्वार्थत्यागाभावात् अतो भागलक्षणा जहदजहल्लक्षणा युज्यते अदोषतः पूर्वोक्तदोषाभावात् विशेष्यांशस्यात्यागो विशेषणांशस्य त्या
गाच्च तत्त्वंदृष्टान्तः सोऽयंपदार्थाविव यथा सोऽयं देवदत्त इत्यत्र तद्देशादिविशिष्टोऽतीतानुभवविषयो वा तत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमा
नो वेदशब्दार्थः तयोश्च विरुद्धविशेषणकत्वादैक्यासंभवेन देशादिरूपविशेषणत्यागेनानुभवगतातीतत्वादिविशेषणत्यागेन वा लक्षणयैक्यमेत
द्वदिति भावः २७ अथात्मनोऽस्य जीवोपाधिमाह रसादीति रसा एव पंच आदिर्येषां तानि पंचीकृतानि यानि भूतानि तेभ्यः संभवो यस्य तत्तथा पं
चीकरणं चेत्थं एकैकं भूतं द्विधा विभज्यते तत्रैकं भागं चतुर्धा विभज्यते ते भागा नोऽन्येतरभूतचतुष्टयीयार्धभागचतुष्टये संयोजने एकैकभूतं पंचा

एकात्मकत्वाज्जहती न संभवेत्तथाऽजहल्लक्षणता विरोधतः। सोऽयंपदार्थाविव भागलक्षणा युज्येत तत्त्वंपदयोरदोषतः २७ रसादि
पंचीकृतभूतसंभवं भोगालयं दुःखसुखादिकर्मणां। शरीरमाद्यन्तवदादिकर्मजं मायामयं स्थूलमुपाधिमात्मनः २८ सूक्ष्मं म
नोबुद्धिदशेन्द्रियैर्युतं प्राणैरपंचीकृतभूतसंभवं। भोक्तुः सुखादेरनुसाधनं भवेच्छरीरमन्यद्विदुरात्मनो बुधाः २९

त्मकं भवति भागाधिक्यात् व्याप्तिविकृतया भूतादिव्यवहारोऽपि सुखदुःखयोरादीनि कारणानि यानि कर्माणि तेषां भोगस्तत्कर्मजसुखदुःखा
[illegible] नुभवस्तस्यालयं आश्रयं भूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजं प्रारब्धीयकर्मजन्यं मायामयं पुरपरयामा
याधिकारस्तद्विकारभूतविकारत्वात् एतच्छरीरं आत्मनः स्थूलमुपाधिं विदुरिति शेषः २८ अथ सूक्ष्मोपाधिमाह सूक्ष्ममिति बुधा अत्र स्थूलशरी मे
रविलक्षणं शरीरं लिंगदेहाख्यमात्मन उपाधिं विदुः तत्स्वरूपमाह सूक्ष्ममेव सूक्ष्मसंज्ञं विशेषं मनोबुद्धिदशेन्द्रियैः प्राणैश्च युतं संकल्पात्मकं मनः नि
श्चयात्मिका बुद्धिः घ्राणरसनचक्षुस्त्वक्श्रोत्रेति पंच ज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि प्राणापानव्यानोदानसमाना राम
ख्याः प्राणास्तैर्युतं एतत्सप्तदशांशसमुदायात्मकं तदाधारभूतान्याह अपंचीकृतभूतसंभवं तदुक्तं अत एवादृश्यं तथा भोक्तुः सुखादेः सुखदुःखा १६
नुभवस्यानुसाधनं स्थूलशरीरस्येतरत्रगतस्यैव भोगसाधनत्वमिति भाव- एतद्वियोगेनैव मरणव्यवहार इति बोध्यं २९ ॥ ॥

शति जीवोपाधिद्वयमुक्त्वा ईशोपाधिमाह अनादीति अनादि उत्पत्तिहीनं नानाविधपरिणामशालितया परिणामरूपेणानश्वरमिति अनादित्वमाश्री
त्यास्य चितेः अतिबाध्यं सत्त्वासत्त्वाभ्यां निर्वक्तुमशक्यं कारणं सकलप्रपंचस्य जनकं ईदृशी माया तु ब्रह्मणः परं ईश्वरव्यवहारसंपादकत्वात्कुल
हूं प्रधानं शरीरकं स्वार्थकः एवमुपाधिभेदादेकमेव चैतन्यं यतः पृथक्स्थितं जीव ईश इति भेदबुद्धिविषयमतो लसत्तायोपाधिपरित्यागेन स्वात्मानमा
त्मनि अवधारये भेदे न जानीयात्तत्क्रमात् श्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ३० अथवा कार्यविचारफलमाह कोशेष्विति आनंदमये स्वप्रल
त्वेऽन्नमयप्राणमयमनोमयविज्ञानमयेषु चतुर्षु कोशेषु तत्तत्संगात्तत्तदाकृतिर्विभाति यथा जपादिसंगात्स्फटिकोऽनेकाकृतिर्भाति आनंद
मयस्यापि जीवत्ववादिनां तु तेन सह पंचसु कोशेष्विति बोध्यं अस्मिन्नात्मनि कोशेषु परितो विचारिते सम्यग्विचारिते सति अयमात्मा असंगरूपः अ
न्नमयादिभिः संगरहितः असंगो न हि सज्जत इति श्रुतेः अतो ह्ययं विज्ञायते स्थूलोहमित्यादि स्वस्वतत्तत्कोशसंगात्प्रतीतिः स्फटिक

अनाद्यनिर्वाच्यमपीह कारणं माया प्रधानं तु परं शरीरकं उपाधिभेदात्तु यतः पृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ३०
कोशेष्वयं तेषु तु तत्तदाकृतिर्विभाति संगात्स्फटिकोपलो यथा असंगरूपोयमजो यतोऽद्वयो विज्ञायतेऽस्मिन्परितो विचारिते ३१
बुद्धेः त्रिधा वृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः अन्योन्यतोस्मिन्व्यभिचारतो मृषा नित्ये परे ब्रह्मणि केवले शिवे ३२

वत तत्वत्तस्मात्तु न तथा प्रतीतिरिति भावः एवं तत्तदुपाधिसत्तत्तद्रूपताप्रतीतिनिरास एव विचारफलमिति भावः ३१ जाग्रदाद्यवस्थापि बु
द्धिधर्मो नात्मधर्म इत्याह बुद्धेरिति इह आत्मनि स्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन या त्रिधा वृत्तिर्दृश्यते सापि गुणत्रयात्मनः सत्वरजस्त
मोरूपगुणत्रयस्वरूपाया बुद्धेः ~~शिशि इह आत्मनि स्वप्ना~~ धर्म उ तावदवस्थात्रयस्योक्तगुणमूलकत्वादेतदवस्थात्रयस्यास्मिन्नवस्थात्रयसाक्षि
णि आत्मनि भानं तदाध्यासनिबंधनं न तु वास्तवमित्यर्थः अन्योन्यतो व्यभिचारतस्तत्स्वाप्नावस्थात्रयस्य स्वरूपतो मृषात्वात्तत्तद्रा
न स्वप्नस्य जाग्रत्वमेव स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् जाग्रति इतरद्वयस्याभावात् सुषुप्तावितरयोरभावात् परस्परं व्यभिचारो बोध्यः आत्मन
स्तदाश्रयत्वं विशेष्य नित्ये उत्पत्तिनाशशून्ये परे गुणत्रयातीते ब्रह्मणि व्यापके केवले असंगे शिवे आनंदरूपे एवंभूते सदैकरसे
परस्परव्यभिचारिधर्मभानं न संभवतीति भावः ३२

पा२ ५४ ५१ मैः४ गा२

...प जगत् देहेन्द्रियादिरस्य समहंत्वनेन हानोपादानबुद्धिं विषयं न कुर्यात्। किंतु उदासीन स्तत्र भवेत्। ननु देहेन्द्रियादि
...सारं मिथ्यैव तत् ५

सु॰ उ॰ त॰ २२

अथ तात्पर्यवाच्यं संसारमूलभूतां वृत्तिमाह देहेति एषां संघातस्ततरेत राध्यासविषयात् अज्ञस्य यावद्वियोबुद्धेस्तत्तिलमोसृकलत याऽकुल
क्षरणात् अतत्वस्यापि कार्यावस्थारिवर्त्तते तावद्भवोद्भवे संसारोद्भवो भवेत् तमः परंरजसोऽपुपलक्षणं रजस्तमःप्रधाना बुद्धिः संसारहेतुत्वा
त्सर्वथा त्याज्येति भावः ३३ कृतमहावाक्यविचारस्य कर्त्तव्यमाह नेतीति अथात् आरोपेण नेति नेतीति प्रमाणेन निराकृतं मिथ्यात्वेन गृही
तमखिलं जगद्येन सः ततो हृदा सत्वप्रधानेन मनसा सम्यगात्मा दितं चित्तलक्षणं घनामृतं दुःखासंभिन्नसुखं च येन सः स्वर्गादि तु परिणा
मदुःखत्वात्तत्वं भिन्नं ज्ञानलाभात् काय मुपजीव्य स्वात स्वत्यागात् तत्त्वाग्रोऽप्य दृष्टान्तदर्शनेन परिहरति यथा तत्वावान् ज्ञातः सुद्रसोमाधु
र्य येन तादृशो नारिकेलनारेणा हिफलांतर्वर्त्तसंभः पीत्वा तत्स्थानं भूतं तत्फलं जहाति तत्रोदासीनो भवति तद्वत् सर्वं दृश्यसारांशो ब्रह्मतत्त्वा

देहेन्द्रियप्राणमनश्चिदात्मनां संघातमजस्रं परिवर्त्तते धियः वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः ३३
नेति प्रमाणेन निराकृताखिलो हृदा समास्वादितचिद्घनामृतः त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथांभः प्रजहाति तत्फलं ३४
कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धते नवः निरस्तसर्वातिशयः सुखात्मकः [illegible] स्वयंप्रभः सर्वगतोऽयमद्वयः

भे सतिनिःसारं दृश्यं नोपादेयं नापिहेयमिति भावः तयोर्भयादिसंभावनातद्धेयमित्युच्यते ३४ इतरस्मानित्यत्वेन तत्त्रैवैराग्यार्थमात्मन
एव नित्यसत्वमाह कदाचिदिति कदापीत्यर्थः अनवः उत्पत्यनंतरं विद्यमानो हि नवः तेन जन्मानंतरास्तित्वव्यावर्त्तितं नवत्वाभावेनैवजी
र्णत्वाभावाद्ध्वस्यंगत्वापत्तिरूपपरिणामोपि निरस्तः अनेन जायते अस्ति विपरिणमते वर्धते क्षीयते नश्यतीति षड्भावविकारराहित्यमु
क्तं एवं चैतादृशे सर्वमुक्ता षड्भावविकारत्वादनित्यमिति ततो विरज्येतेति बोधितं यतः इदृशोऽत एव निरस्तः सर्व स्मादेहेन्द्रियादेरतिशयोम
हत्वं येन स्वलाभात्तस्य लाभान्नापरो लाभ इति श्रुतेः यतः सुखात्मकः आनंदस्वरूपः स्वयंप्रभः स्वप्रकाशः अदेहेन्द्रियादिकृतदुःखरू
पः परप्रकाशकश्च तस्य भासा सर्वमिदं विभातीति श्रुतेः सर्वगतो व्यापकः अयमहं बुद्धिविषयः प्रत्यगात्मापि अद्वयः उक्तादृश ब्रह्म
स्वरूप एव न ततोऽतिरिक्त इति भावः अयमात्मा ब्रह्मेति श्रुतेः ३५

एम २२

नन्वेवंविधे विकारशून्ये आत्मनि जन्ममरणादिप्रवाहरूपसंसारभानं कथमिति शंकते। एवंविधे इति दुःखमयः दुःखप्रचुरः उ
त्तरं प ति अज्ञानतः इति अज्ञानमूलको योऽध्यासो देहेंद्रियादौ अहं ममेत्यध्यासस्तस्मात् एवं चेदस्यां निरूपातत्प्रतीतिरिति भावः न
न्वेवं कथं तस्य संसारस्य निवृत्तिस्तत्राह ज्ञानेति आविर्भूते इति शेषः ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षण एव कारणभूताज्ञानना
शात्तत्कार्यसंसारस्यापि विलय इत्यर्थः यथा रज्जुज्ञाने रज्जुसर्पस्य लय इत्यर्थः ३६ अथाध्यासलक्षणमाह। यदन्यदिति यदन्यत्स
र्पादिकमन्यत्र रज्ज्वादौ भ्रमात् भ्रमजनकदोषाद्विभाव्यते विलोक्यते इति विपश्चितो विद्वांसोऽध्यासं प्राहुः यथाऽसर्पभूते रज्ज्वादौ आहि

[illegible] विभाव्यते [illegible] एवंविधे ज्ञानमये सुखात्मके कथं भवो दुःखमयः प्रतीयते। अज्ञानतो
ध्यासवशात्प्रकाशते ज्ञाने विलीयेत विरोधतः क्षणात् ३६ यदन्यदन्यत्र विभाव्यते भ्रमात् अध्यासमित्याहुरमुं विपश्चितः। अ
सर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत् ३७ विकल्पमायारहिते चिदात्मकेऽहंकार एषः प्रथमः प्रकल्पितः
अध्यास एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे ३८

विभावनं सर्पारोपो यो रज्जुबुद्धिमूलकस्तद्वदीश्वरेपि जगत् देहादिसंसारात्मकं सर्वं विभाव्यते आत्मज्ञानाभावाद्यथार्थतया ज्ञायते ३७
आत्मनि जगद्भाने कीदृशोऽध्यासो निमित्तं तत्राह। विकल्पेति सर्वविकल्पकारणमायारहिते वस्तुतस्त [illegible] संगरहिते चिदात्मके चित्स्व
रूपे सर्वकारणे निरामये दुःखासंभिन्नानंदमये केवले सर्वविकारशून्ये परे दृश्यविलक्षणे ब्रह्मणि व्यापके आत्मनि प्रथममहंकारः
कल्पितः स एवाध्यासः अहंबुद्ध्यात्मकोऽध्यास एव सर्वसंसारकारणमिति भावः ३८

क १

अ० ३
१६

बुद्धिनिष्ठ एव संसारेण त्वात्मनिष्ठः तत्रान्वयव्यतिरेकौ प्रमाणयति इच्छादीति। परे सर्वसाक्षिणि आत्मनि संस्तिरेतवः भासमानसं
सारकारणं संदृशकालत्रयेपि इच्छादिरागादिसुखादिधर्मिकाः इच्छायेषि रागद्वेषौ सुखदुःखे रेतस्यैव मारिद्वंद्वधर्मिकाः धिय एव धीषु संसा
रः सन्वयमुक्त्वा तद्व्यतिरेकेत व्यतिरेकमाह यस्मात्कारणात् प्रसुप्तौ तदभावात् धीवृत्त्यभावात् परः आत्मा नो स्मामिस्तृतीयार्थे षष्ठी सु
खस्वरूपेण स्वस्वरूपमात्रेण विभाव्यते निश्चीयते न तु संसारित्वेनेति भावः सुप्तोत्थितः सुखमहमस्वाप्समिति प्रत्यभिज्ञ तीयापर्थे ब्र

इच्छादिरागादिसुखादिधर्मिकाः सदा धियः संसृतिहेतवः परे। यस्मात्प्रसुप्तौ तदभावतः परः सुखस्वरूपेण विभाव्यते हि नः ३९
अनाद्यविद्योद्भवबुद्धिविंबितो जीवः प्रकाशोयमितीर्यते चितः आत्मा। धियः साक्षितया पृथक्स्थितो बुद्ध्याऽपरिच्छिन्न
परः स एव हि ४०

स्तु सुखमहमस्वाप्समिति प्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोस्तीति तात्पर्यं ३९ पुनस्तत्त्वंपदार्थस्वरूपमाह अनादीति अनादि
र्याविद्या तत उद्भवो यस्या बुद्धेरंतः करणस्य तत्र विंबितः प्रतिविंबितो यश्चितः प्रकाशः स जीव इतीर्यते आत्मा परमात्मा धियः सा
क्षितया धीधर्मासंगेनैव पृथक्स्थित अंतर्यामित येत्सर्थः जीवोहं सुखीत्यादिप्रकारेणांतःकरणधर्माध्यासवान्परमात्मा तु सा
क्षितया सर्वत्र विद्यमानोपि न तथेति भावः अत एव बुद्ध्याऽपरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितः अतएव परः एवं च ज्ञाने
न प्रतिविंबाधारविलये प्रतिविंबस्य विलयात्स जीवः स एव परमात्मैव हि प्रसिद्धं सरहस्यस्य चाहन्निर्बोध्या ४० सीतरामचन्द्रायनमः

राम
१८

अथ बुध्यात्मनोः परस्पराध्यासवशात्परस्परधर्मभानमिति दर्शयिपुनराह। चिद्बिंबेति। आत्मचेतसोरन्योन्याध्यासवशात्संतादात्म्यारोपाज्जडाजडत्वं प्रतीयते चेतसो वृत्तीनां [illegible] ज्ञानत्वं जीवात्मनो जडत्वं प्रतीयते अत एव ज्ञाताऽहमात्मेति चित एव तार्किकव्यवहारः नीयात्मनि जडात्माकथ्यते बुद्धेरिति स्मर्तव्यवहारश्च अध्यासहेतुः चिदिति स्फारि चिद्बिंबं यस्य स चिदाभासः अक्षैः सेंद्रियः स चा[struck] सामनः धीरंतःकरणं तेषां प्रसक्तसंघात अतिसंनिकर्षाद् अध्यास इत्यर्थः तत्र दृष्टांतः अनलाक्तलोहवत् अग्नितप्तलो

उ२ सहितः साक्ष

चिद्बिंबसाक्षात्मधियां प्रसंगतस्त्वेकत्रवासादनलाक्तलोहवत्। अन्योन्यमध्यासवशात्प्रतीयते जडाजडत्वं च चिदात्मचेतसोः ४१ गुरोः सकाशादपि वेदवाक्यतः संजातविद्यानुभवो निरीक्ष्य तं। स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरं ४२

हपिंडवत् अग्निधर्मो दाहकत्वं लोहे लोहधर्मश्च वर्तुलत्वाघनत्वे भासते तेन तत्र हेतुरेकत्रवासात् परस्पराविभागेन वर्तनेरित्यर्थस्तद्वदेनयोरपि परस्परधर्माध्यास इत्यर्थः ४१ उक्तमेवार्थं दर्शयिपुनराह गुरोरिति वेदवाक्यतः स्वनेन श्रवणं गुरोः सकाशादपि ततश्चानेन मननमुक्तं ताभ्यां संजातो विद्यया ज्ञानरूपस्यात्मनोऽनुभवो यस्य सः। अनेन कृतनिदिध्यासन इत्यर्थः तं चिदानंदस्वरूपं स्वात्मानं उपाधिवर्जितं अनन्तसंहितोपाधिधर्मं आत्मस्थं तत्त्वं निरीक्ष्य अपरोक्षीकृत्याशेषं जडं दृश्यं संत्यजेत्। तत्रोदासीनो भवेदिति भावः ४२

ज्ञेयं निरुपाधिकं स्वरूपं श्लोकद्वयेनाह। प्रकाशेति अहं प्रकाशरूपः स्वप्रकाशः परप्रकाश्यो हि न प्रकाशरूपो यथा घटादिः अजो जन्मादिविकारहीनः अद्वयः सजातीयद्वितीयरहितः असकृद्विभातः [illegible] सकृदपि परेण [illegible] सकौ नरेण प्रकाशितः सकृद्विभातोऽसकृद्विभातः न तत्र सूर्यो भाति न चंद्रतारकमिति श्रुतेः न तद्भासयते सूर्य इति स्मृतेश्च अतीव निर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयः कर्तृत्वाभिमानरहितः संपूर्णः देशकालपरिच्छेदहीनः आनंदमयः आनंदरूपः स्वार्थे मयट्। अक्रियः परिणामहीनः ४३ सदैवेति अहं सदैव कालत्रयेपि मु

अ·ए·उ
१८

प्रकाशरूपोहमजोहमद्वयोसकृद्विभातोहमतीवनिर्मलः विशुद्धविज्ञानघनो निरामयः संपूर्ण आनंदमयोहमक्रियः ४३ सदैवमुक्तोहमचिंत्यशक्तिमानतींद्रियज्ञानमविक्रियात्मकः। अनंतपारोहमहर्निशं बुधैर्विभावितोहं हृदि वेदवादिभिः ४४ एवं सदात्मानमखंडितात्मना विचारमाणस्य विशुद्धभावना हन्यादविद्यामचिरेण कारकैः रसायनं यद्वदुपा[illegible]

क्तः सर्वधर्मरहितः अचिंत्यशक्तिमान् यः परमात्मा अतींद्रियज्ञानं इंद्रियातिरिक्तज्ञानरूपः यतो वाचो निवर्तंते अप्राप्य मनसा सह इति श्रुतेः अविक्रियात्मकोऽपरिणामी अनंतपारः अंतः कालतः पारः परतीरं तावविद्यमानौ यस्य तेन देशकालपरिच्छेदहीनः ईदृशो यः परमात्मा बुधैर्हृदि अहर्निशं विभावितः सोहमित्यर्थः ४४ एवं भावनायाः फलमाह एवमिति अक्लि[illegible]ष्टा सदा आत्मानं अखंडितात्मना विषयानवरुद्धचित्तेन विचारमाणस्य ध्यायतः धातूनामनेकार्थत्वात् चरमाण एव चारमाणः स्वार्थे णिच् विशुद्धभावना ब्रह्माकारवृत्तिः कारणं च निरुद्धे निःशेषसा चोदिता कारकैः देहांतरप्रापककर्मभिः सहाविद्यामचिरेण शीघ्रमेव हन्यात् यथोपासितं सेवितं रसायनं रुजो हन्यात्तद्वत्। ४५

रामः
१९

तत्र ध्यानेतिकर्तव्यतामाह विविक्त इति निर्जने इत्यर्थः आसीनोपयोचितपद्मासनाद्युपविष्टः उपारतेंद्रियः निवृत्तव्यापारेंद्रियः तेन शमदमादिसंपन्नः विनिर्जितात्मप्राणायामादिभिर्जितांतःकरणः अतएव विमलांतराशयो विशुद्धचित्तः विज्ञानदृक् चिदानंदैकदृ कृभानं यस्य सः दृक् दृश्यभानरहितः अनेनेन निर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहि तः केवलोऽसंगः आत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः संज्ञा यस्य सः तेन न कदापि विषयांतरसंचारवर्जितः विभावयेत ध्या येत ४६ किंच यदेतत् भूतभविष्यद्वर्तमानं विश्वं परमात्मादर्शने भासको यस्य तत्तस्य भासासर्वमिदं विभातीति श्रुतेः तत्सर्वकार णोमायासंनिधानात्सर्वोपादानत्वेनाभिमते आत्मनि विलाययेत् उपादानसत्वोव्यतिरेकेण कार्यसत्वानुपपत्तेः तादृशस्य लक्षणमा

विविक्त आसीन उपारतेंद्रियो विनिर्जितात्मा विमलांतराशयः। विभावयेदेकमनन्यसाधनो विज्ञानदृक्केवल आत्मसंस्थि तः ४६ विश्वं यदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे। पूर्णश्चिदानंदमयोवतिष्ठते नवेद बाह्यं न च किंचिदांतरं ४७ पूर्वं समाधेरखिलं विचिंतयेदोंकारमात्रं सचरं जगत्। तदेव वाच्यं प्रणवो हि वाचको विभाव्यतेऽज्ञानवशान्नबोधतः ४८

चरा

हसंपूर्णः अवाप्तसमस्तकामः तस्य काम्याभावात् चिदानंदमयः तद्रूपोवतिष्ठते बाह्यमांतरं च दृश्यं न जानाति सर्वत्र ब्रह्मदर्श नादितिभावः ४ समाधिसिद्धेः पूर्वं यत्कर्तव्यं तदाह पूर्वमिति समाधेः सकलविषयत्यागानंतरमिति पूर्वं कं ब्रह्माकारवृत्तिसमाधि स्ततः पूर्वं अखिलं सचराचरं जगत् ॐकारमात्रं विचिंतयेत् ओंकारे मीयते नयेति मात्राप्रमाणबोधकत्वेन परिच्छेदको यस्य त थ्यानानीयात् तदेव विवरणोतित्ति देवेति जगदेवेत्यर्थः प्रणवो वाचको विभाव्यते एतत् हि सिद्धमित्यर्थः इयं भावनाऽज्ञानवशा देव न बोधतः बोधो निर्विशेषब्रह्मसाक्षात्कारस्तदुत्तरं नेत्यर्थः तस्य सर्ववस्तुपमर्दकत्वात् ४८

उक्तमर्थं विवृणोति अकारेति अकारसंज्ञस्तद्वाच्यः पुरुषो हि विश्वको विश्व एव विश्वकः विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी
विराट् ततः स्वप्नसाक्षी तैजसः तेन पदेन परिभाषितः लिंगदेहाभिमानी हिरण्यगर्भ उकारकः उकारप्रतिपाद्य इत्यर्थः ततः सुषुप्तिसा-
क्षी प्राज्ञपदवाच्यो मायोपाधिको मकारस्तद्वाच्यः परिपद्यतेऽखिलैर्देहैः इयं भवना समाधिपूर्वं समाधेः पूर्वमेव न तत्त्वतः तत्त्व-
अ॰ उ साक्षात्कारे सति न भवेत् सर्वस्य ब्रह्मणि प्रविलयात् ४८ अथ विलापनप्रकारमाह। स्थूलं विश्वं त्विति तदकारमध्ये बुद्ध्या व्यवस्थि-
२० तं स्थूलदेहनिबंधनस्थूलभोगाभिमानेन स्थितं विश्वं पुरुषं तद्वाचकमकारं च विलापयेत् तत्र स्वार्थे विलीनं भावयेत्। ततस्तैजसं

अकारसंज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस इयेते क्रमात्। प्राज्ञो मकारः परिपद्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो भ-
वेत्। ४९ विश्वं त्वकारं पुरुषं विलापयेदुकारमध्ये बहुधा व्यवस्थितं। ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्रणवस्य चां-
तिमे ५० मकारमप्यात्मनि चिद्घने परे विलापयेत् प्राज्ञमपीह कारणं। सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ् मुक्त उपा-
धितोऽमलः ५१

लिंगदेहाभिमानिनं पुरुषं तद्वाचकं प्रवर्णं द्वितीयवर्णं उकारं विलीनविश्वकं मकारे विलाप्य विलीनं भावयित्वा ५० ततस्तादृशं मकार-
स्तद्वाचकं प्राज्ञं मकारं कारणात्माभिमानिनं पुरुषं रहात्मनि चित्तघने परे विलापयेत् तथा भावयेत् ततः सोऽहं सर्वविलापाधिष्ठा-
नं परं ब्रह्म विभावयेत् तद्विशिनष्टि सदा विमुक्तिमत् नित्यमुक्तं नन्वहं पदार्थस्य रागद्वेषादिमलिनस्य कथं ब्रह्मत्वभावने आशंक्या-
ह परार्थं विशिनष्टि उपाधितो मुक्तः अत एवामलः तथा भावने साधनं विज्ञानदृक् विज्ञानं निदिध्यासनं ब्रह्ममात्रप्रत्ययावच्छि-
द रूपं दृक् तत्साक्षात्कारसाधनं यस्य सः ५२

एम
२०

नाव॰

एवंभावं जीवन्मुक्तलक्षणमाह। एवमिति। उक्तप्रकारेण सदा ज्ञातापरमात्मनैकभावना यस्य सः परिविस्मृतमखिलं पुत्रदेहादि येन सः
अत एव स्वस्वरूपानंदेनैव तुष्टः न तु विषयानंदेन तस्य परिणामे दुःखरूपत्वात्ततो विरक्त इत्यर्थः साक्षात् नित्यात्मसुखप्रकाशकः
साक्षात् औपाधिकनामरूपभेदराहित्येन नित्यमखंडितं आत्मस्वरूपं यस्तु सुखप्रकाशश्च तद्रूपः एवंरूपो विमुक्तो जीवन्मुक्तः अच
लनिश्चलं वारि यस्य तादृशो सिंधुवत् विषयसंबंधरूपलहरीरहित आस्ते इत्यर्थः ५२ ईदृशस्य मत्प्राप्तिर्भवसेवेत्याह। एवमि
ति उक्तप्रकारेण सदाभ्यस्तसमाधेर्योगिनः निवृत्ताः सर्वेषामिंद्रियाणां गोचरा विषयाः शब्दादयो यतस्तस्य विनिर्जिता

एवं सदा ज्ञातपरात्मभावनः स्वानंदतुष्टः परिविस्मृताखिलः आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसिंधुवत्। ५२ एवं सदाभ्यस्तसमाधियोगिनो निवृत्तसर्वेंद्रियगोचरस्य हि। विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ५३ ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबंधनः प्रारब्धमश्नन्नभिमानवर्जितो मय्येव साक्षात्प्रविलीयते ततः ५४ आदौ च मध्ये च तथैव चांततो भवं विदित्वा भयशोककारणं। हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनां ५५

अशेषारिपवः कामादयो येन तस्य तज्जयेन विषयेष्वंतःकरणाप्रवृत्तिः सूचिता अत एव सर्वज्ञत्वनित्यतृप्तत्वबोधरूपत्वस्वतंत्र
त्वनित्यमलुप्तत्वानंतरूपाः षड्गुणा यस्य तादृशः आत्मा जितो वशीकृतो येन तस्य सदा दृश्यो भवेयं। एतेन मद्भक्तस्य योगिनो ऽहं दृश्यो
न तु म[illegible] विमुखस्येति निसृष्टं ५३ एवंविधो जीवन्मुक्तः प्रारब्धवशेनाभिमानहीनः भोगान् अनुतिष्ठन् ततो मय्येव विलीयते न मद्
यो भवतीत्याह। ध्यात्वैवमिति ५४ सर्वधर्मापेक्षया मामेव धर्मो ज्यायानित्याह। आदौ चेति। भवं संसारं आदिमध्यावसानेषु सर्वथा
भयशोकयोः कारणं विदित्वा तत्कारणीभूतं विधिवादैर्यजेतेत्यादिभिश्चोदितं बोधितं समस्तं कर्ममार्गकाम्यं हित्वा अखिलात्मना
जीवानां स्वरूपभूतमात्मानं परमेश्वरं भजेत्तत्पया धनस्यार्जनेनाशेर्दुःखं मध्ये पालनकृतं अंते च राजादिकृतं भयं अंते नाशे शोक
यदेव साधिदुःखमेव पदार्थमात्रे इत्यर्थः ५५

जी

शं॰मुनि:

श्री॰ उत्त॰ २१

यथाभेद भावनयानामरूपाविभागेनमद्रूपएवभवतीत्यसमुमर्थसदृष्टांतमाहात्मनीति आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपंजीवम
भेदेनविभावयनपरांतिष्ठतीतिशेषः तदात्मयात्मनापरमेश्वरेणाभेदेनभवति अभिन्नोभवतितत्रदृष्टांतः यथासमुद्रेप्रविष्टनद्या
दिजलंसमुद्रएवयथाक्षीरेवारिक्षीरेप्रक्षिप्तंपयःक्षीरमेवयथाव्योम्निमहाकाशेघटाद्यवछिन्नाकाशोघटादिभंगेयथाचमेभस्त्रि
काद्यवछिन्नोवायुरनिलेमहावायौनामरूपविभागेनैकीभवतीत्यर्थः ५६ एवमात्मतत्त्वज्ञस्यजगत्सत्त्वभ्रमः स्वतएवापैतीत्या
हइत्थमितिहिर्यस्मात्लोकसंस्थितोपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिभावयनसनपरिपदाह्य

आत्मन्यभेदेनविभावयन्निदंभवत्यभेदेनमयात्मनातदा। यथाजलंवारिनिधौयथापयःक्षीरेवियद्व्योम्न्यनिलेयथानिलः

५६ इत्थंपरीक्षेतहिलोकसंस्थितोजगन्मृषैवेतिविभावयन्मुनिः।निराकृतत्वाछ्रुतियुक्तिमानतोयथेंदुभेदोदिशि

दिग्भ्रमादयः ५७ यावन्नपश्येदखिलंमदात्मकंतावन्मदाराधनतत्परोभवेत। श्रद्धालुरत्यूर्जितभक्तिलक्षणोयस्तस्य

दृश्योहमहर्निशंहृदि ५८

मीक्षेतऐकात्म्यंजानीयात्तदानिवृत्तजगत्सत्यत्वभ्रमोभवतीतिशेषः तत्रहेतुः श्रुतियुक्तिमानतोनिराकृतत्वात श्रुतोन्यदार्तमि
त्यादिश्रुतिरूपात्जगन्मिथ्यादृश्यत्वात शुक्तिरजतवदितितदुपबृंहितानुमानरूपयुक्तिरूपान्मानतः प्रमाणतोनिराकृतत्वात्तत्रे
दृष्टांतोयथेंदुभेदः एकत्वचंद्रेद्विचंद्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्त्ततेयथाचदिशिमाव्याहो अन्यदिकूत्वभ्रमः सोपितत्वज्ञाना
न्निवर्ततेएवत्रमतः पुरुषस्यादिशुभ्रमणभ्रमानकटवर्त्तिवृक्षादेश्चभ्रमणभ्रमस्तत्स्थैर्यज्ञानेननिवर्त्ततेनेन ५७ इदृशज्ञानेप
राधनमेवोपायइत्याह यावदिति अखिलंजगतमदात्मकंमदधिष्ठानकंमद्विवर्तंभूतंयावन्नपश्येत तावन्मदाराधनेश्रद्धालुः
भगवदाराधनमेवज्ञानप्रापकमित्यत्रदृढविश्वासवान् अतिशयेनोर्जिताधृढामतीर्भक्तिर्मयिभगवतिप्रेमस्थनावृत्तिरूपायस्य
णोयस्यसः तावन्मदाराधनतिष्ठोभवेत्एवंहितस्यहृदि अहमहर्निशंदृश्योभवामियेयथामांप्रपद्यंतेतास्त

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथयन्नेतदालोचनमपि मदाराधनप्रतिबंधकदुरितध्वंसोपाय इत्याह। रहस्यमिति। श्रुतिसारसंग्रहत्वेनातिगोपनी
यत्वा अप्रमाणशंकाकलंकरहितं वस्तु चिंतं आलोचयन्ति सम्यग्विचारयन्ति ५८ अथ भगवान् उक्तमेवार्थं संक्षेपेणादर्शयन्पुनराह। प्रातरिति
यदीतियदि स्पष्टार्थं यदिदं जगत्परिदृश्यते तत्सर्वं मायैवेति ज्ञायते इति शेषः। चेतसा सर्वपूरितं स्वत्र ब्रह्मसीत्येकत्वामृतावनया मेदे तं भावनया भावि
तं शुद्धमानसं यस्मात् अदृशस्तिष्ठति तस्य यदिष्यं। शिष्यः प्राह निरामयः सुखसुखोऽभवत् सर्वदुःखनिवृत्तस्येति भावः ततोनंतरं गामस्यामाह। आनंदमयोऽभ

रहस्यमेतच्छ्रुतिसारसंग्रहं मया विनिश्चित्य समंततोदितं प्रिय। यस्त्वेतदालोचयतीह बुद्धिमान्समुच्यते पातकराशिभिः क्षणात् ५९ प्रातर्यदी
दं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा। मद्भावनाभावितशुद्धमानसः सुखी भवानंदमयो निरामयः ६० यः सेवते मामगुणं गुणात्प
रं हृदा कदा वा यदि वा गुणात्मकं। सोहं स्वपादांचितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ६१

...विस्मृतं कं रहस्यं भूषणाम्नायिवत् ६० एवं रीत्या स्वोपासकस्य लोकपावनत्वमाह य
स्यार्थः यद्यपि पूर्वं मानं हृद्रूपस्त्वमस्त्येव तन्मायापितत्वाग्निः करणेन यो मामगुणं प्राकृतसत्त्वरजस्तमोरूपगुणरहितं सच्चिदानंदरूपत्वात् अत एव
यदतिरूढा वा यदा चित्स्वरिच्छः हृदा निर्मलेनांतःकरणेन यो मामगुणं सर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवान्नाम्नां मूर्तिर्यस्य तं रहस्यमा
गुणात्परं गुणरहितं प्राकृतात्परं मायातीतं यदि वा यदेहस्यार्थं गुणात्मकं अहं मत्स्वरूप एव मामकरत्वर्थो वा प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः इत्युक्तेः नाद्रशोभक्तः स्वया
नरूपसेवते स द्विविधोप्युपासकः अहं मत्स्वरूप एवमामकरत्वर्थो
दलग्नरेणुभिः स्पृशन् लोकत्रयमपि पुनाति अज्ञानध्वान्तनिरसनेन पवित्रीकरोति यथा रविः स्वकरैः जगद्विनिमिरं करोति तद्वत् ६१

दशानामेतदूयार्या लोचनानासमर्थस्य पाठमात्रतोपि महत्फलमाह विज्ञानं विज्ञानजनकं कारणं मुमुक्षसेजिबोध्यं वेदान्तैरुपनिषद्भावैर्वेद्यं चरणं
न गच्छन्मादिलक्षणं कर्म यस्य तेन ननु पठनमात्राद्वेतादृशमहत्फलप्राप्तिः कथमित्याशंक्याभवस्येवेति सूचयन्नत्र हेतुमाह मद्वचनेषु भक्तिर्विश्वा
सोपरीक्ष्यः गुरुवाक्यविश्वासस्यैव फलदायकत्वादिभावः ६२ इति श्रीमत्सकलगुणविप्रद्दुर्गणासमर्थस्यादिविरुदावलीविराजमानस्य हिम्म

विज्ञानमेतदखिलं श्रुतिसारमेकं वेदान्तवेद्यचरणेन मयैव गीतं। यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः ६२
इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकांडे ब्रह्माण्डे श्रीरामगीता नाम पंचमः सर्गः ५ एकदा मुनयः सर्वे
यमुनातीरवासिनः आजग्मू राघवं द्रष्टुं भयाल्लवणरक्षसः १ कृत्वाग्रे तु मुनिश्रेष्ठं भार्गवं द्विजाः च्यवनं। असंख्याताः समाया
ता राममारभ्य पकांक्षिणः २ तान्पूजयित्वा परया भक्त्या रघुकुलोत्तमः उवाच मधुरं वाक्यं हर्षयन्मुनिमंडलं ३ करवाणि मुनिश्रे
ष्ठाः किमागमनकारणं। धन्योऽस्मि यदि यूयं मां प्रीत्या द्रष्टुमिहागताः ४ सुदुष्करं वा यत्कार्यं भवतां तत्करोम्यहं। आज्ञापयन्तु
मां भृत्यं ब्राह्मणा दैवतं हि मे ५ तच्छ्रुत्वा सहसा हृष्टश्च्यवनो वाक्यमब्रवीत्। मधुर्नाम महादैत्यः पुरा कृतयुगे विभो ६ आसीद
तीव धर्मात्मा देवब्राह्मणपूजकः तस्य तुष्टो महादेवो ददौ शूलमनुत्तमं ७ प्राह चानेन यं हंसि स तु भस्मीभविष्यति। रावणस्या
नुजा भार्या तस्य कुंभीनसी श्रुता ८

तिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतावध्यात्मरामायणसेतौ उत्तरकांडे श्रीरामगीताटीका पंचमः सर्गः ५ एकदेति लवणराक्षसः
लवणनाम्नो भयादित्यर्थः १ रामालवणभयनाशकांक्षिणः २ ३ हे मुनिश्रेष्ठाः अहं किं भवत्कार्यं करवाणि मत्समीपे भवदागमन
भवदागमनस्य च किं कारणं यदि यत्प्रीत्या सर्वदुःखनिवर्तनक्षमस्य बुध्यापात्रीतिस्तथापि द्रष्टुमागतास्तद्धन्योऽस्मि ४ ५ ६ अनुत्त
मं न विद्यते यस्मादुत्तममधिकं यस्मात्तत् ७ ८

अ० ३
२२

पतो दुरात्मा ऽतः सर्वैर्दुर्धर्षो दुःसहः ९ वो युष्माकं मभीः भवत्विति शेष १० विगतज्वराः गतदुःखाः ११ लवणं राक्षसमिति तस्य को वा हनि
ष्यतीत्यनेनान्वयः को वा त्राता लोकेभ्यो ऽपरघातरक्षतीत्यर्थः १२ १३ १४ वधाय च वधाय त्वित्यर्थः हन्मीं हनिष्यामीत्यर्थः १५ १६

तस्यां तु लवणो नाम राक्षसो भीमविक्रमः आसीद्दुरात्मा दुर्धर्षो दिव ब्राह्मणहिंसकः ९ पीडितास्तेन राजेंद्र वयं त्वां शरणं गताः
तच्छ्रुत्वा राघवो प्याह मा भी र्वो मुनिपुंगवाः १० लवणं नाशयिष्यामि गच्छंतु विगतज्वराः इत्युक्त्वा प्राह रामो पि भ्रातॄन् को वा हनि
ष्यति ११ लवणं राक्षसं रघा त्राता लोकेभ्यो भयं महत् तच्छ्रुत्वा प्रांजलिः प्राह भरतो राघवाय वै १२ अहमेव हनिष्यामि देवा ता
पयमां प्रभो ततो रामं नमस्कृत्य शत्रुघ्नो वाक्यमब्रवीत् १३ लक्ष्मणेन महत्कार्यं कृतं राघव संयुगे। नंदिग्रामे महाबुद्धिर्भरतो दुः
खमन्वभूत् १४ अहमेव गमिष्यामि लवणस्य वधाय वा। त्वत्प्रसादाद्रघुश्रेष्ठ हन्म्यंतं राक्षसं युधि १५ ततः श्रुत्वा स्वां कमारे
प्य शत्रुघ्नं शत्रुसूदनः प्राहाभिषेक्ष्यामि मधुराज्यकारणात् १६ आनाय्य च सुसंभारान् लक्ष्मणेनाभिषेचने। आनि
च्छंतमपि स्नेहादभिषेकमकारयत् १७ हत्वा तस्मै शरं दिव्यं रामः शत्रुघ्नमब्रवीत्। अनेन जहि बाणेन लवणं लोककंटकं
लक्ष्मणार्थं तु जं तं नानाप्राणिवधाय च १८ स तु नायाति सदनं यावद्धनचरो
१९ स तु संप्राप्य तच्छूलं गेहे गच्छति काननं। भवेत्। तावद्देवपुरद्वारि तिष्ठत्व धृतकार्मुकः २० योत्स्यते स त्वया क्रुद्धस्तदा वध्यो भविष्यति। हत्वा लवणं क्रूरं तद्वनं मधु
संतिते २१। निवेश्य नगरं तत्र तिष्ठत्वं मे नु शासनात्। अश्वानां पंचसाहस्रं रथानां च तदर्द्धकं २२ गजानां षट्शतानि हयद्री
नामयुतत्रयं। आगमिष्यति पश्चात्त्वमग्रे साधय राक्षसं २३

अभिषेचने अभिषेचननिमित्ते विषयसप्तम्यामयमर्थः फलं ति अकास्य तव सि द्धादिभिरिति शेष १७ १८ गेहे संप्राप्य स्थापयित्वा वनं गच्छतीत्यर्थः १९ स तु यावद्वनचरो भवेत् भवति सदनं नायाति तावद्देवेत्यन्वयः २० क्रुद्धः सन् योत्स्यते शूलविनैवेति शे
षः २१ २२ त्वमग्रे प्रथममेकलएवराक्षससाधय नाशय पश्चात्तद्धीतरं सेनात्वत्समीपमागमिष्यती
त्यर्थः २३

२४ २५ स्फीतां समृद्धां जनपदां जनवासस्थानभूतां पूर्वं तु वनरूपामासीत् तथा २६ २७ २८ क्रममेवाह उपनीतौ चेति पत्युः शंकरेण पार्वत्यै प्रोक्त
रामायणं तद्धरीपवरे हरणार्थं मया वेदतात्पर्यं चैतानि निमित्तमप्राहमत श्रावितौ पर्यंत श्रुवोधितवानित्यर्थः २९ तंत्री शब्दः तालाभ्यासः समायुक्तौ

श्रं

अ॰ ३

२३

इत्युक्त्वा मधुवधाय प्रेषयामास राघवः । शत्रुघ्नं मुनिभिः सार्धमाशीर्भिरभिनंद्य च २४ शत्रुघ्नोपि तया चक्रे यात्रामेव चौरितः
हत्वा मधुसुतं पुरं मधुरामकरोत्पुरीं २५ स्फीतां जनपदां चक्रे मथुरां राजमानतः । सीतापि सुषुवे पुत्रौ द्वौ वाल्मीकेराश्रमे २६ मुनि
स्तयोर्नाम चक्रे कुशो ज्येष्ठोनुजो लवः । क्रमेण विद्यासंपन्नौ सीतापुत्रौ बभूवतुः २७ उपनीतौ च मुनिना वेदमध्यापनतत्परो । हृत्स्नं रा
मायणं प्राह काव्यं वाल्मीकयोर्मुनिः २८ शंकरेण पुरा प्रोक्तं पार्वत्यै पुरहारिणा । वेदोपबृंहणार्थाय तावग्राहयत प्रभुः २९ कुमारौ स्व
रसंपन्नौ सुंदरौ वह्निना विव । तंत्रीतालसमायुक्तौ गायंतौ चेरतुर्वने ३० तत्र तत्र मुनीनां तौ समाजे सुररूपिणौ । गायंतौ वभितो द
दृशा विस्मिता मुनयोब्रुवन् ३१ गंधर्वेष्विह किन्नरेषु भुवि वा देवेषु देवालये पाताले घु वा चतुर्मुखगृहे लोकेषु सर्वेषु च । अस्माभि
श्चिरजीविभिश्चिरं दृष्टादृशः सर्वतो नाकर्णायदि रागीतवा घगरिमा नादर्शिना श्राविच ३२ एवं स्तवद्भिरखिलैर्मुनिभिः प्रतिवासरं
आसाते सुखमेकांते वाल्मीकेराश्रमे चिरं ३३ अथ रामोश्वमेधाय दीक्षां कारव [illegible] दक्षिणान् । पत्नीं स्वर्णमयीं सीतां विधाय वि
पुलक्रतिः ३४

अवैषम्येण पुत्रौ यत्र यो वैषम्यं न भवति तया गायंतौ चेरतुः तंत्रीलयेति पाठे तंत्र्यालयो मृदंगा तत्र समायुक्तौ अस्यनत्रिपुणौ ३०
३१ मर्त्यलोके गंधर्वकिन्नरमध्ये नेदृशः देवलये स्वर्गे देवेषु न पाताले नागेषु न अथवा ब्रह्मलोकेपि नेदृशो गायकः नास्तापीत्यस्यैव विवरणं
नादर्शि साक्षादीदृशं गानं स्वकर्णाभ्यां न श्रुतमित्यर्थः नाश्राविकर्णोपकर्णिकया मुकदेशे ईदृशो विशिष्टगाता स्तीति न श्रुतमयेत्यर्थः
३२ स्तवद्भिर्मुनिभिः सहेति शेषः ३३ ३४

विताने पत्तसंसदि दक्षवः पत्तमिति शेषः ३५ संगत्यसंगे गृही त्वात् ऋषि वाल्मीकेः स्थानस्य ३६ ज्ञानशास्त्रं तत्वज्ञानकारणं शास्त्रं श्रुतः परं मुनि
वियोगकालस्य संनिहितत्वादिति गुह्यतत्वप्रपच्छुरिति भावः ३७ भवतः सकाशादिति शेषः संसृतिर्बंधः संसाररूपो वंधः ३८ ३९ तच्च
मतः श्रुत्वाय यामयोरिति तं कथितं भविष्यति ४० तथैवाचरेत्यन्वयः अदेहस्य वस्तुतो देहसंबंधहीनस्यापि देहागेहमेव यथा गृहस्वामि
नागृहस्य नतादात्म्यं तथास्य चिदात्मनो देहे नापि न तदिति भावः ४१ तस्य चिदात्मनोऽस्मिन्देहे हंकार एव मंत्री सचाहंकारस्तेनैव कल्पितः

तस्मिन्विताने ऋषयः सर्वे राजर्षयस्तथा ब्राह्मणाः क्षत्रिया वैश्याः समाजग्मुर्दिदृक्षवः ३५ वाल्मीकिरपि संगत्य याग यातो तौ कु
शीलवौ। जगाम ऋषिवालस्य समीपं मुनिपुंगवः ३६ तत्रैकांते स्थितं शांतं समाधिविरमे मुनिं। कुशः पप्रच्छ वाल्मीकिं ज्ञानशास्त्रं श्रु
यांतरे ३७ भगवन् श्रोतुमिच्छामि संक्षेपाद्भवतो खिलं देहिनः संसृतिर्बंधः कथमुत्पद्यते दृढः ३८ कथं विमुच्यते देही दृढबंधात्कृपा
भिधात। वक्तुमर्हसि सर्वज्ञ मत्यशिष्याय ते मुने ३९ वाल्मीकिरुवाच। शृणु वत्स प्रवक्ष्यामि ते सर्वं संक्षेपाद्बंधमोक्षयोः। स्वरूपं येन संबं
धमत्तः श्रुत्वाय योरिति ४० तथैवाचर भद्रं ते जीवन्मुक्तो भविष्यसि। देहएव महागेहे ह्यदेहस्य चिदात्मनः ४१ तस्याहंकार एवास्मिन्मंत्री
तेनैव कल्पितः देहगेहाभिमानं स्वस्मिन्नारोप्य चिदात्मनि ४२ तेन तादात्म्यमापन्नः स्वचेष्टितमशेषतः। विरधाति चिदात्मनं तेन दासि
तवपुः स्वयं ४३ तेन संकल्पितो देही संकल्पनिगडैर्वृतः। पुत्रदारगृहादीनि संकल्पयति चानिशं ४४ ॥ ॥ ॥

तत्संनिधानेन मर्यादया यास्वरूपः परिणामस्तत्तेन कल्पितस्तस्मात्सोऽहंकारः स्वस्वीयदेहरूपगेहविषयमहमाकारं ममेत्साकारं वा अभिमानं चि
दात्मनि आरोप्य ४२ तेन चिदात्मना तादात्म्यमभेदमापन्नोऽयं तो तं स्वचेष्टितं चिदात्मने विरधाति निनुजदस्याहंकारस्य कथं चेष्टितस्य तत्रा
हतत्वात्तिनवपुः तत्संपकारेवतादृशसामर्थ्यवान् प्रजागद्रत्यर्थः ४३ तेनाहंकारेण संकल्पितो यमेव संकल्पान्करोति इति संकल्पवीर्यपीकृतः
पराधीनः संकल्पेनैव तत्तदानरूपे संततसंनिकर्षेण तादात्म्यापन्नत्वात् यथा भार्याविशिष्ट एव गृहस्थस्य भार्यायेति चमप गृहारस्तदद्यंत्र गृहादौ

तानेकाममयनततस्त्वोमेलब्ध्वानाशेंच शोचतित्रयः तमः सत्वंरजोरूपाः ४५ तेदेवाहं तमइत्यादि एवजगतः स्थितेः कारणंतेषांकार्यविशे
षानाह तमोरूपादितितमोरूपात्तमोगुणप्राधान्येनकृतात्संकल्पादित्यर्थः वृत्तिशक्तिमतोरभेदात्तमोरूपादित्युक्तिः कारणानुरूपत्वात्का
र्यस्य तन्कृतवेष्टयात्तामसत्वं ४६ एवंसत्वरूपरूपात्सत्वादिव्याख्येयं तत्कार्यं धर्मेत्यादि यस्मात्संकल्पः सधर्मादिविशिष्टो भवति ४७ मो
क्षो प्यनमेवरात्याप्राप्यः स्याहादूरेति अतएवसपुरुषः सुखरूपस्तिष्ठतीति हि प्रसिद्धं यस्मरजोरूपः संकल्पः सलोकेव्यवहारवान् ४८ तन

संकल्पयन्स्वयंदेहीयरिशोचतिसर्वदा त्रयस्तस्याहमोरेहात्रधमोत्तममध्यमाः ४५ तमःसत्वरजः संज्ञाजगतः कारणंस्थितेः त
मोरूपाद्धिसंकल्पान्नित्यंतामसचेष्टया ४६ असंततामसोभूत्वाक्रिमिकीटत्वमाप्नुयात् सत्वरूपोहिसंकल्पोधर्मज्ञानपरायणः ४७
अदूरेमोक्षसाम्राज्यः सुखरूपोहितिष्ठति रजोरूपोहिसंकल्पोलोकेसव्यवहारवान् ४८ परितिष्ठतिसंसारेपुत्रदारानुरंजितः त्रि
विधंतुपरित्यज्यरूपमेतन्महामते ४९ संकल्पः परमाप्नोतिपरमात्मपरिक्षये दृश्यैः सर्वैः परित्यज्य नियम्यमेसामनः ५० सबाह्या
भ्यंतरार्थस्य संकल्पस्यक्षयंकुरु यदिवर्षसहस्राणितपश्चरसिदारुणं ५१ पातालस्थस्यभूस्थस्यस्वर्गस्थस्यापितेनघनान्यः
कश्चिदुपायोस्तिसंकल्पोपशमादृते ५२ अनाबाधेउविकारेस्विसुखेपरमपावने संकल्पोपशमेयत्नंयौरूषेणपरंकुरु ५३

परितिष्ठतिसंसारेपुत्रदारानुरंजितस्संकल्पकृतनजत्तत्कर्मवशात्तिष्ठतियस्यसंकल्पानस्सर्वोक्तत्रिविधमपिरूपंपरित्यज्याशाम्यतीति
शेषः ४९ सपरंपरमाप्नोतिसस्वरूपंसंकल्पस्यहिक्रमेणसर्वसंकल्पनाशद्वारेणदूरंमोक्षस्यप्राप्तुंक्षचोध्यं आत्मपरिक्षये अत्रात्मासंक
ल्पः अतत्वदृश्यैः सर्वेंद्रियवृत्तान्नियरित्यज्यमनसेवमनोविनियम्यविषयेभ्योविनिवर्त्याहृदयेव ५० बाह्येंद्रियविषयसहितोयआ
भ्यंतरेंद्रियविषयार्थस्तस्यतद्विषयस्यसंकल्पस्यक्षयंकुरु संकल्पंत्यजेत्यर्थः अन्योपायेननसर्वथासुखप्राप्तिरित्याहयदीति ५१ नादृशा
तपः पूर्वकंपातालाद्यन्यतमलोकस्थस्यापितवसंकल्पोपशमादृतेतंविना ५२ अनाबाधेदुःखसमिश्रेअविकारेविषयसंबंधविनै
वप्राप्येपरमपावनेस्वात्मरूपेसुखेतत्प्राप्तिनिमित्तनकश्चिदुपायोस्तीत्यर्थस्तस्मात्तु

१-उ-
२४

त

संकल्पस्यैव सर्वाधारत्वात्तन्नाशे एव सर्वविषयनिवृत्तिरिति साह संकल्पतंतून् विच्छिन्नविभवाः विच्छिन्नो भवः संसारो येभ्यस्तादृशास्ते परमा-
वाप्तिं कुर्यांतीति तन्न । नीमः सर्वथा नश्यंत्येवेति भावः ५४ तस्मान्निःसंकल्पोत्पत्तेः श्रेयो यथाप्राप्तव्यवहारं कुर्वित्यर्थः संकल्पक्षयफलमा-
ह स्यदिति ५५ गत संभ्रमहठेन विकल्पजालं त्यक्त्वा अधिगतः परमार्थो ब्रह्मतत्त्वं येन तद्भावमुपेत्य प्राप्य तत् द्वितीयपदं अधिगमय प्राप्नु-
हि वितततत्सुखायानुष्ठेयसुखाय तत् यं निदिध्यासनमुपरिशांतिस्तु मुक्तकालिकचित्तवृत्तिर्यस्य तादृशो भव सकलविषयरहितचि-

संकल्पतंतौ निःखिलाभावाः श्रोता : किलानघ । छिन्नेतंतौ न जानीमः क्व यांति विभवाः पराः ५४ निःसंकल्पो यथाप्राप्तव्य-
वहारपरो भव । क्षये संकल्पजालस्य जीवो ब्रह्मत्वमाप्नुयात् ५५ अधिगतपरमार्थतामुपेत्य प्रसभमपास्य विकल्पजालमुच्चैः
अधिगमय परं तदद्वितीयं विततसुखाय सुषुप्तचित्तवृत्तिः ५६ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकांडे प-
ष्ठः सर्गः । वाल्मीकिना बोधितो सौ कुशः सद्योगतभ्रमः । अंतर्मुक्तो बहिः सर्वमनुकुर्वंश्चचार सः १ वाल्मीकिरपि तौ प्राह
सीतापुत्रौ महाधियौ । तत्र तत्र वरगायंतौ पुरेविथिषु सर्वतः २ रामस्याग्रे प्रगायेतां शुश्रूषुर्यदि राघवः नग्राह्यं वै सुवर्णांतद्य

त्तवृत्तिरेव ब्रह्माकार चित्तवृत्तिरितिभावः ५६ इति श्रीमत्सकलराजविपुद्धरणसमर्थेसारि विरुदावलीविराजमानस्य हिमतिवर्मणः
पुत्रस्य श्रीरामवर्मणः कृतावध्यात्मरामायणसेतौ उत्तरकांडे षष्ठः सर्गः ६ वाल्मीकिनेतिसत्गुरूपदेशात् कुशस्योत्तमाधिकारि-
त्वाद्धि तत्कालमेव निदिध्यासनांतसाधनसंपरितिभावः यत्करोति तदनुकुर्वन्निवचचारेत्यभावादितिभावः १ २ यदि किंचिद्राघवो
धनं दास्यति तत्र ग्राह्यं २

यथोक्तं यथाशिक्षितं २४ अपूर्वपाठजातिं अपूर्वपठनरीतिं गेयेन गानेन प्राप्तौ ५६ शब्दविदः व्याकरणविदः ७ संप्रवेशयत् अ
ऽभाव आर्षः ८ एवं दारकौ च दृष्ट्वा विस्मिताः संतोऽनिमेषणा अपश्यन्निमेषः ९ बिंबं प्रतिबिंबं १० ११ अतिमानुषं मनुष्यमनु

अ० ३
२५

इति तौ चोदितौ तत्र गायमानौ विचेरतुः यथोक्तं ऋषिणा पूर्वं तत्र तत्राभ्यगायतां ४ तां स शुश्राव काकुत्स्थः पूर्वचर्यां ततस्ततः अपूर्वपाठजातिं च गेयेन समभिप्लुतां ५ बालयो राघवः श्रुत्वा कौतूहलमुपेयिवान्। अथ कर्मान्तरे राजा समाहूय महामुनीन् ६ राज्ञश्चैव नरव्याघ्रः पंडितांश्चैव नैगमान्। पौराणिकान् शब्दविदो ये च वृद्धा द्विजातयः ७ एतान् सर्वान् समाहूय गायकौ सप्रवेशयत्। ते सर्वे हृष्टमनसो राजानो ब्राह्मणादयः ८ रामं तौ दारकौ दृष्ट्वा विस्मिता ह्यनिमेषणाः अवोचन् सर्व एवैते परस्परमथागताः ९ इमौ रामस्य सदृशौ बिंबाद्बिंबमिवोदितौ। जटिलौ यदि न स्यातां न च वल्कलधारिणौ १० विशेषं नाधिगच्छामो राघवस्यानयोस्तदा एवं संवदतां तेषां विस्मितानां परस्परं ११ उपचक्रमतुर्गातुं तावुभौ मुनिदारकौ ततः प्रवृत्तं मधुरं गांधर्वमतिमानुषं १२ श्रुत्वा तन्मधुरं गीतमपराह्णे रघूत्तमः उवाच भरतं चाप्यांरीयतामयुतं वसु १३ दीयमानं सुवर्णं तु न तज्जग्रहतुस्तदा। किमनेन सुवर्णेन राजन्नौ वन्यभोजनौ १४ इति संसत्प्रसंरंतं जग्मतुर्मुनिसंन्निधिं एवं श्रुत्वा तु चरितं रामः स्वस्यैव विस्मितः १५ ज्ञात्वा सीताकुमारौ तौ शत्रुघ्नं चेदमब्रवीत्। हनूमंतं सुषेणं च विभीषणमथांगदं १६ भगवंतं महात्मानं वाल्मीकिं मुनिसत्तमं। आनयध्वं मुनिवरं ससीतं देवसंमितं १७ अस्यास्तु पर्षदो मध्ये प्रत्ययं जनकात्मजा। करोतु शपथं सर्वे जानंतु गतकल्मषां १८ इति तद्वचनं श्रुत्वा गताः सर्वेऽतिविस्मिताः ऊचुर्यथोक्तं रामेण वाल्मीकिं एम पार्षदाः १९
बालो कीयगानमतिक्रांत १२ १३ तौ आवां वन्यभोजनौ स्वरविशेषः १४ १५ १६ १७ प्रत्ययस्तव जनस्य शुद्धत्वनिश्चयो यस्मात् स्वशपथमित्यन्वयः १८ सीतां मिनिपूर्वान्वयि १९

एमस्य तद्भूतं सर्वं ज्ञात्वा वाल्मीकिरब्रवीत् । श्वः करिष्यति वैसीता शपथं जनसंसदि २० २१ राघवस्यापि सविधे तद्वच उक्तुरिति अन्वयः
एतानोमुनयः इति संबोधने २२ सीतायाः २ शपथः ख्यातस्याः शुभाशुभं धर्माधर्मरूपं विजानन्तु निर्णयं तु २३ २४ २५ वाष्पकंठा

एमस्य तद्भूतं सर्वं ज्ञात्वा वाल्मीकिरब्रवीत् । श्वः करिष्यति वैसीता शपथं जनसंसदि २० यो । चितां परमं दैवं पतिरेव न संशयः
धरामो न श्रुत्वा सहसा गत्वा सर्वे प्रोचुर्मुनेर्वचः २१ राघवस्यापि श्रुत्वा मुनिवचस्तथा एतानो मुनयः सर्वे शृणुध्वमिति चाब्रवीत्
२२ सीतायाः शपथं लोका विजानंतु शुभाशुभं । इत्युक्ता राघवेणाथ लोकाः सर्वे दिदृक्षवः २३ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा
ह श्चैव महर्षयः वानराश्च समाजग्मुः कौतूहलसमन्विताः २४ ततो मुनिवरः स्तूर्णं ससीतः समुपागमत् । अग्रतस्तमृषिं कृत्वा यांती
किंचिदवाङ्मुखी २५ कृतांजलिर्वाष्पकंठा सीता यत्नविवेशनं । दृष्ट्वा लक्ष्मीमिवायांतीं ब्रह्माणमनुयायिनीं २६ वाल्मीकिं
दृष्टनः सीतां साधुवादो महानभूत् । नरा मध्ये ततो घस्य प्रविश्य मुनिपुंगवः २७ सीतासहायो वाल्मीकिरिति प्राह च राघवं ।
इयं दाशरथे सीता सुव्रता धर्मचारिणी २८ अपापा ते पुरा त्यक्ता ममाश्रमसमीपतः लोकापवादभीतेन त्वया राम महावने २९
प्रत्ययं दास्यते सीता तदनुज्ञातुमर्हसि । इमौ तु सीतातनयौ इमौ यमलजातकौ ३० सुतौ तु तव दुर्धर्षौ तथ्यमेतद्ब्रवीमि ते प्रचेतसो
हं दशमः पुत्रो रघुकुलोद्वह ३१ अनृतं न स्मराम्युक्तं यथेमौ तव पुत्रकौ । बहून् वर्षगणान् सम्यक् तपश्चर्या मया कृता ३२ नोपा
श्नीयां फलं तस्या दुष्टेयं यदि मैथिली वाल्मीकिनैवमुक्तस्तु राघवः प्रत्यभाषत ३३

वाष्पकंठा सैव २६ २७ २८ अपापापि लोकापवादभीत्यास्त्यक्ता २९ सा सीता प्रत्ययं विश्वासजनकं शपथं अत्र स्थाने ऋषेरतिकरुणार्
साक्रांतचित्ततयास्माविति पदयोजनाकृत्वनरोपाय ३० तत्रादौ भगवान्वाल्मीकिः स्वधर्मशपथैः सीताया अदुष्टत्वं स्थापयति
प्रचेतसः इत्यादिना ३१ यथा अधपावरन्तमुक्तं तस्मरामि तथा इमौ तव पुत्रकाविति वाक्यमपि सत्यमेव स्यर्थः ३३

पा

…प्रत्ययो विश्वासः ३४ महान्प्रत्ययः प्रत्ययजनकः शपथोऽग्निप्रवेशरूपः ३५ लोकभयात् लोककृतदुर्वादभयात् ३६ जगतीमध्येनह्या
निं लोकमध्ये शुद्धायां शपथेन सर्वलोकज्ञातशुद्धत्वायां ३७ ३८ ३९ विवरं प्रवेशायच्छिद्ररूपमार्गं ४० महाद्भुतमसाश्चर्यपरिदृं

अ॰ ३ २६

एवमेतन्महाप्राज्ञ यथा वदसि सुव्रत । प्रत्ययो जनितो मह्यं तव वाक्यैरकिल्बिषैः ३४ लंकायामपि दत्तो मे वैदेह्या प्रत्ययो महान् देवानां पुरतस्तेन मंदिरं संप्रवेशिता ३५ सेयं लोकभयाद्ब्रह्मन् अपापाप्यसती पुरा । सीता मया परित्यक्ता भवान् तत्क्षंतुमर्हसि ३६ न मैव जातौ जानामि पुत्रौ वे जानामि पुत्रा वे तौ कुशीलवौ । शुद्धायां जगतीमध्ये सीतायां प्रीतिरस्तु मे ३७ देवाः सर्वे परिज्ञाय रामाभिप्रायमुत्सुकाः ब्रह्माणमग्रतः कृत्वा समाजग्मुः सहस्रशः ३८ प्रजाः समागमं दृष्ट्वा सीता कौशेयवासिनी । तु रुद्धमुखी त्वधोदृष्टिः प्रांजलिर्वाक्यमब्रवीत् ३९ रामादन्यं यथाहं वै मनसापि न चिंतये । तथा मे धरणी देवी विवरं दातुमर्हसि ४० तथा शपंत्याः सीतायाः प्रादुरासीन्महाद्भुतं । भूतलाद्दिव्यमत्यर्थं सिंहासनमनुत्तमं ४१ नागेंद्रैर्ध्रियमाणं च दिव्यदेहैर्विप्रभाभृ दैवी तां जानकीं दोर्भ्यां गृहीत्वा स्नेहसंयुता ४२ स्वागतं तामुवाचैनामासने संन्यवेशयत । सिंहासनस्था वैदेही प्रविवेश ततो रसातलं ४३ निरंतरा पुष्पवृष्टिर्दिव्या सीतामवाकिरत् । साधुवादश्च सुमहान् देवानां परमाद्भुतः ४४ ऊचुश्च बहुधा वाचो ह्यंतरिक्षगताः सुराः अंतरिक्षे च भूमौ च सर्वे स्थावरजंगमाः ४५

सिंहासनं प्रादुरासीत् ४१ सर्वाश्चर्यत्वदिव्यत्वोपपादकं विप्रभमिति ४२ दोर्भ्यां गृहीत्वा स्वागतामिति तामुवाचाथैनामासने संन्यवेशयत् ४३ साधुवादश्चासीदिति शेषः ४४ बहुधा वाचः बहुप्रकारा वाचः सीते नैवं कर्तुमर्हसि इति राघवो गृहीतशपथोऽपि पुनः शपथग्रहणे प्रवृत्तस्तस्यै एवं बहुप्रकारा वाचः ४५

सीताशपथकारणात् तत्र कुधा वा चक्रुचुरित्यनुकर्षः तस्माच्चिंतापराः क्व सीता गमिष्यतीत्यादिचिंतायुक्ताः ध्यानपरायणाः भूमप्रवेशाक
लिकसीतारूपस्य ध्यानपरायणाः ४६ रामं निरीक्षतः किं करिष्यतीत्याद्येवं सीता निरीक्षतः कथं गच्छत्येवेस्याद्येवं प्रकारेण। अचेतनमा
सीदिति शेषः ४७ भविष्यतः कार्यस्य गौरवं निश्चयं ज्ञात्वैव ज्ञात्वापि ४८ अज्ञानान्निव मुशोच लोकव्यवहारानुसारेण सर्वः बोधितः भा

वानराश्च महाकायाः सीताशपथकारणात्। केचिच्चिंतापरास्तस्माः केचिद्ध्यानपरायणाः ४६ केचिद्रामं निरीक्षंतः केचित्सीता
मचेतसः। मुहूर्त्तमात्रं तत्सर्वं तूष्णीभूतमचेतनं ४७ सीताप्रवेशनं दृष्ट्वा सर्वं संमोहितं जगत्। रामस्तु सर्वं ज्ञात्वैव भविष्यत्कार्यगौ
रवं ४८ अज्ञानान्निव दुःखेन शुशोच जनकात्मजां। ब्रह्मणा ऋषिभिः सार्द्धं बोधितो रघुनंदनः ४९ मतिं बुद्ध्वा स्वश्राद्धकार
नंतराः क्रियाः। विससर्ज ऋषीन्सर्वान् ऋत्विजो ये समागताः ५० तान्सर्वान्धनरत्नाद्यैस्तोषयामास भूरिशः। उपादाय कुमारौ तौ
अयोध्यामगमत्प्रभुः ५१ नराधिप निस्पृहो रामः सर्वभोगेषु सर्वदा। आत्मचिंतापरो नित्यमेकांते समुपस्थितः ५२ एकांते ध्यान
निरते एकदा राघवे सति। ज्ञात्वा नारायणं साक्षात् कौशल्या प्रियवादिनी ५३ भक्त्यागत्य प्रसन्नं तं प्रणता प्राह हृष्टधीः राम त्वं ज
गतामादिरादिमध्यांतवर्जितः ५४ परमात्मा परानंदः पूर्णः पुरुषईश्वरः जातोसि मे गर्भगृहे मम पुण्यातिरेकतः ५५

विनोदुःयरिहरत्वादिकर्मभिः कृतदुःखापनयनः ४८ ऋत्विजो ये इत्यत्र तान्विससर्जेत्यनुकर्षः ५० तान् ऋत्विक्प्रभृतीन् ५१ एकांते
समुपस्थितः तत्रैवास्थितश्चासीत ५२ ध्याननिरते राघवे सतीत्यर्थः रामं तद्वारित्रै ऋषिवाक्यैश्रुतरूपावशान्नारायणं ज्ञात्वा ५३
प्रणता नारायणं प्रणम्य निवुध्या आदेः कारणं स्वयं चोत्पत्तिना - शरहितस्तत्र भावादेवच मध्यवर्जितः ५४ सर्वेषां परम उत्कृष्ट
आत्मा अंतर्यामिविधया प्रेरकत्वात् परानंदः हिरण्यगर्भानंदादपि उत्कृष्टो य आनंदस्तद्रूपः पूर्णः पुरेशः प्राप्तसर्वकामत्वात् पूर्णः अ
तएवेश्वरः सर्वनियंतार्ईदृशोपि त्वं मम गर्भरूपे गृहे मदीयपुण्याधिक्याज्जातः जातवान् ५५

अवसाने स्वस्यावसानकाले। तिवार्धके इत्यर्थः स्वदेवतारसमाप्तिकाले च समयः प्रस्थावसरः अवबोधज्ञ अज्ञानजः छत्स्नो ... ततेस
र्दरात्वसंगाखि विभ्रिवृत्तो यिसर्वथान निवर्त्तनइति भावः ५६ इदानीमपि अवसानकाले पि तथा संक्षेपतो बोधये सन्वयः निर्वेदो वि
षये घलप्रस्यपतेनवादिनी मीदृशवचनवक्त्री ५७ त्रान्मार्गानाह ... कर्मेत्यादि। अत्रेदं बोध्यं ज्ञानयोगस्त्रिधा एतज्जन्मानुष्ठितक
र्मयोगसंपादितचित्तशुध्याजातः एतज्जन्मानुष्ठितभक्तियोगकृतचित्तशुध्याजातः पूर्वार्जिताभ्यामाभ्यां संपादितया एतज्जन्मनितरस्तु

अवसाने ममाप्येष समयो भद्र उत्तमा। नाद्याप्यवबोधजः छत्स्नो भवबंधो निवर्तते ५६ इदानीमपि मे ज्ञानं भवबंधनिवर्तकं यथा
संक्षेपतो भूयात्तथावबोधय मां विभो ५७ निर्वेदवादिनीमेवं मातरं मातृवत्सलः दयालुः प्राह धर्मात्मा जराजर्जरितां प्रभो ५८
मार्गास्त्रयो मया प्रोक्ताः पुरा मोक्षाप्तिसाधकाः कर्मयोगो ज्ञानयोगो भक्तियोगश्च शाश्वतः तेषां तु सुलभो मार्गो भक्तियोगः सप्र
जितः ५९ भक्तिर्विभिद्यते मातस्त्रिविधा गुणभेदतः स्वभावो यस्य येनैव तेन तस्य भक्तिर्विभिद्यते ६० यस्तु हिंसां समुद्दिश्य दंभं
मात्सर्यमेव वा। भेददृष्टिश्च संरंभी भक्तो मे तामसः स्मृतः ६१ फलाभिसंधिर्भोगार्थी धनकामो यशस्तथा। अर्चादौ भेदबुध्या

ज्ञानानपेक्षो वेति अन्यथा केवलकर्मभक्तिभ्यां ज्ञानं विना मोक्षस्यत मेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यते यनायेति श्रुतिवि
रुद्धतमापद्येत अत्र मल्लासंगतिः स्यादिति दिक्। तेषां मध्ये भक्तियोगरूपो मार्गो ज्ञानजननेसुलभ इत्यर्थः ५९ गुणभेदतः तमोरजःस
त्वरूपगुणभेदेन तामसी राजसी सात्विकी चेति त्रिविधेत्यर्थः ६० भक्तित्रैविध्याद्भक्तस्यापि त्रैविध्यं तत्र तामसं भक्तमाह यस्त्विति हिंसा श
त्रोर्मरणं पूजालाभादिफलकं मात्सर्यं परगुणद्वेषः भेददृष्टिः अरिमित्रादिदृष्टिः संरंभी तत्तनिष्ठ प्रयत्नवान् ६१ फलं स्वर्गादिः तदभिसंधि
स्तत्कामः भोगरैहिकः यशः इत्यर्थः गोवलीवर्दन्यायेन पृथग्निर्देशः अर्चादौ प्रतिमादौ आदिनास्थंडिलादिग्रहणाद्यावन संग्रहः भे
दबुद्ध्या अयमुपास्योऽहमुपासक इत्येवरूपाया ६२

पोनिर्हरणाय पापनाशाय कर्म मत्स्जनरूपे परस्मिन्नपि अर्पितं कुर्यात भगवतः प्रेरणया परस्वातंत्र्ये रामपाद्रुनं तेन स एववृत्ष्पत्थितिबुद्धि
र्वलायंतं नाम अथवा शास्त्रबोधितत्वाद् एवश्यकर्तव्यमिति बुध्वा वा यः कुर्यात्स सात्विकः अत्रापि भेदबुध्येमुपादानाद् भेदबुद्धिरेतत्फलमिति
सूचितं ६३ एतत्फलीभूतं निर्गुणभक्तियोगलक्षणमाह मद्गुणेति अविछिन्नामनोवृत्तिरित्यनेन अनेनतगुणालये मयि याऽविछिन्नामनो
वृत्तिरेतत्सगुणध्यानस्य निर्गुणध्यानस्यलक्षणप्रापकं तत्र दृष्टान्तः यथागंगांबुनोऽबुधौ इति अनेनाभेदविषयत्वमनोवृत्तेर्दर्शितं ६४

परस्मिन्नार्पितं यस्तु कर्मनिर्हरणाय वा कर्त्तव्यमिति वा कुर्यादिद्भेदबुध्या स सात्विकः ६३ मद्गुणश्रवणेरेवमय्यनेनगुणालये अवि
छिन्नामनोवृत्तिर्यथागंगांबुधौ । तदेव भक्तियोगस्य लक्षणं निर्गुणस्य हि ६४ अहैतुक्यव्यवहिता या भक्तिर्मयि पैत्रा मते । सामेसालो
क्यसामीप्यसार्ष्टिसायुज्यमेव वा ६५ ददतोऽपि न गृह्णंति भक्त्या मत्सेवनं विना । स एवात्यंतिको योगो भक्तिमार्गस्य भाविनी ६६ मद्भा
वं प्राप्नुयात्तेन अतिक्रम्य गुणत्रयं महताकामहीनेन स्वधर्माचरणेन च ६७ कर्मयोगेन शस्तेन वर्जितेनातिहिंसनं मद्दर्शनस्तुतिम
हापूजाभिः स्मृतिवंदनैः ६८

अहैतुकं फलानुद्देशः अत एवाव्यवहिता विशेषेणाव्यवहिता संवेदाः सार्ष्टिः सारूप्य ६५ उक्तफलानि ददात्यपि परं तु भक्ता मत्सेवनं वि
ना तेषु मत्सेवायाः अभावात् तानि न गृह्णंति नांगीकुर्वंति स एव सालोक्यादितिरस्कार एव आत्यंतिको योगः स एव पूर्वोक्तो भक्तियोगो मत्सेवारहि
तं मोक्षमपि न बहुमन्यते इति ६६ तेन भक्तियोगेन गुणत्रयमतिक्रम्य मामाप्नोति क्रम्य मद्भावं मय्येकात्म्यं प्राप्नुयात् अथ कर्मयोगमाह महतेति काम
हीनेन फलोद्देशहीनेन स्वधर्म्यमहमद्दर्शनं नित्यमेवानिमित्तिकरूपः तादृशेन कर्मयोगेन मद्भावं प्राप्नुयात् कथंभूतेनातिहिंसनं हिंसनं हि
हिंसावर्जितेन हिंसारहितेनेति यावत् उक्तभक्तियोगप्राप्त्युपायमाह मद्दर्शनेति स्मृतिः स्मरणं वंदनं प्रणतिः ६८

गौ॰ भु

सर्वभूतेषु मद्भावनया ईश्वरभावनया असंगेन दुःसंगपरित्यागेन ६६ यमादयो यमनियमप्राणायामादयः ७० अहमः अहंकारस्य अहं
कर्ताऽस्मीत्यादिबुद्धेः मम धर्मस्य मत्कथादिरूपस्य कीर्तनात् ७१ अंजसा शीघ्रं मां याति मदभिन्नो भवति स्वाश्रयात् वायुना स्वाश्रया यथा गंधघ्राण
त् ७२ अहमात्मा अवस्थितः सर्वत्र चेतनोऽहमेव सर्पः ७३ तं सर्वत्र चेतन्यसंपादकं मामज्ञात्वा बहिः। क्रियोत्पन्नैरनेकभेदैर्द्रव्यैर्गंधपुष्प

अ· ३·
२८

भूतेषु मद्भावनया ऽसंगेनासत्सर्वजनैः बहुमानेन महतां दुःखिनामनुकंपया ६६ स्वसमानेषु मैत्र्या च यमादीनां निषेवया वै
रांतवाक्यश्रवणान्मम नामानुकीर्तनात् ७० सत्संगेनार्जवेनैवत्व्यहमः परिवर्जनात्। कांक्षया मम धर्मस्य परिशुद्धांतरैजनः
७१ मद्गुणश्रवणादेव याति मामंजसा जनः। यथा वायुवशाद्गंधः स्वाश्रयात् घ्राणमाविशेत् ७२ योगाभ्यासरतं चित्तं एवमात्मा
नमाविशेत्। सर्वेषु प्राणिजातेषु अहमात्मा अवस्थितः ७३ तमज्ञात्वा विमूढात्मा कुरुते केवलं बहिः क्रियोत्पन्नैर्नैकभेदैर्द्रव्यैर्मे
मैं नावतोषणं ७४ भूतावमानिनार्चायामर्चितोऽहं न पूजितः ७५ तावन्मामर्चयेद्देवं प्रतिमादौ स्वकर्मभिः यावत्सर्वेषु भूत
षु स्थितं चात्मनि न स्मरेत् यत्नभेदं प्रकुरुते स्वात्मनश्च परस्य च। भिन्नदृष्टेर्भयं मृत्युस्तस्य कु

द्रूपादिभिर्द्रव्यैः अवमेनेतोषणं संतोषं न कुरुते न जनयति इत्यर्थः सर्वभूतस्थितत्वेन मामज्ञात्वा कृतयाऽनया मो हृत्फलरोमसंतोषो
नेत्यर्थः ७४ सर्वप्राण्यपमानकर्त्रा या वस्तुतः प्रतिमा न पूजिता तावदेव वशिष्टानां सा पूजायोग्या तदनंतरं स्वपूज्येत्यर्थः अर्चितः सस्य व्याख्या
ख्या पूजित इति ७५ तावन्मामर्चयेदिति स्वधर्मध्यमणि न्यायेनोत्तरान्वयस्पष्टि। यावत्सर्वभूतस्थितं मामात्मनि न स्मरेत् स एवात्मभिन्न
ज्ञानी यावत् तावदेव पूजाराद्यधिकारो न तदुत्तरं पूज्यपूजकभावापगमात् इति भावः इयं मे भावना मुख्येति ध्वनयितुं भेदेति। यदि भिन्न
दृष्टेस्तस्य मत्स्वभयं कुर्यात् अत्र संशयो नास्तीत्यर्थः ७६

तस्माद्दूरं स्वदेके वा हृमुपाम्य रत्या हृ मामतः इति एकं मां ज्ञानेन मानेन एवं ज्ञानपूर्वकं सर्वप्राणिसंमानेन नमे श्रा सर्वत्र मित्रबुध्या मामर्चेत इयमे
वमे मुख्या पूजा क्वापि शत्रुबुद्धिः सर्वथा न कार्येति भावः अभिन्नधीः एक एव चेतनो भगवान् सर्वत्रेत्येवं बुद्धिरित्यर्थः ७८ तथा सर्वभूता
नि चेतसा प्रणमेत ७९ तत्र हेतुर्ज्ञात्वेति ईश्वरजीवयोरिति परस्परज्ञीकाना चेत्यविबोध्य ८० ज्ञानेन योगसहितो ज्ञानयोग इत्यर्थः एकतरं
मामतः सर्वभूतेषु पारं छिन्नेषु संस्थितं । एकं ज्ञानेन मानेन नमे श्राचार्चेदभिन्नधीः ७८ चेतसैवानिशं सर्वभूतानि प्रणमेत्सुधीः
ज्ञात्वा मां चेतनं शुद्धं जीवरूपेण संस्थितं । तस्मात्कदाचित् नेसेत भेदमीश्वरजीवयोः ८० भक्तियोगो ज्ञानयोगो मया मातरु
दीरितः आलंबैकतरं वापि पुरुषः शममृच्छति ८१ ततो मां भक्तियोगेन मातः सर्वत्र दिस्थितं पुत्ररूपेण वा नित्यं संस्मृत्वा शं
निर्वाप्स्यसि ८२ श्रुत्वा एतस्य वचनं कौशल्या नंदसंयुता एमसदा हृदि ध्यात्वा छित्वा संसारवंधनं । अतिक्रम्य गतीस्तिस्रो
प्यवाप परमां गतिं ८४ कैकेयी चापि योगं रघुपतिगदितं पूर्वमेवाधिगम्य स्रग्धाभक्तिप्रशांता हृदि रघुतिलकं भावयंती गता मुःग
त्वा स्वर्गे स्फुरंती दशरथसहिता मोदमाना वसेथे मातास्त्रीलक्ष्मणस्याप्यतिविमलमतीः प्राप भर्तुः समीपं ८५ इति श्रीभद् ध्यात्म

रामायणे उत्तरकांडे मातृणां स्वर्गप्राप्तिर्नाम सप्तमः सर्गः ७

केवलभक्तियोगमपीत्यर्थः शममृच्छति तस्य परिणामे ज्ञानयोगप्रापकत्वादिति भावः ८१ भक्तियोगेन उक्तरूपेण ईश्वरः पूज्यः हत्येवं रूपेण
तत्रासामर्थ्ये आह पुत्ररूपेणवेति ८२ ८३ तिस्रो गतीः सात्विकराजसीतामसीः तत्र सात्विकी अर्चिरादिगतिः राजसी धूमादिगतिः ता
मसी नाय स्वन्निपस्वेसेरूपा तत्राघा रहरा घुयासकानं छिती याकर्मिणा । ततीयात्वे वा परमा गतिनास्यप्राणा त्युत्क्रामत्स्त्रैवसमव
वलीयं नरनिताति प्राप्या ८४ पूर्वमेव चित्रकूटगिरौ ८५ इति श्रीमत्सकलराजविपदुद्धरणसमर्थे त्यादिविरुदावली विराजमानस्म
म्यतिवर्मणः पुत्रस्य कृताः सेतौ उत्तरकांडे सप्तमः सर्गः ७

अ० ३
२६
४

अथेतिकस्मिन् कस्मिंश्चिद्दिवसे मातुलेनाहूतः स्वदेशसमीपवर्तिनं गंधर्वविषयस्य गंधर्ववधार्थं १ जितस्त्रिःकोटीर्गंधर्वनायकान् हत्वा
तान्वयः पुरे पुष्करावती तक्षशिलाख्ये २ स तौ पुष्करतक्षनामानौ ३४ कुमारौ स्वपुत्रोपपश्चिमां दिशं याहीति शेषः ५ ६ ७ ८ ततः
अथ कालेन तेकस्मिन् भरतो भीमविक्रमः युधाजिता मातुलेन ... याहूतो गात्ससैनिकः १ रामाज्ञया गतस्तत्र हत्वा गंधर्वनायकान्। तिस्त्रः कोटीः पुरे हर्षनिवेशपरघुनंदनः २ पुष्करं पुष्करावत्यां तक्षं तक्षशिलाह्वये। अभिषिच्य सुतौ तत्र धनधान्यसुतहृतौ। ३ पुनरागत्य भरतो रामसेवापरोभवत्। ततः प्रीतो रघुश्रेष्ठो लक्ष्मणं प्राह सादरं ४ उभौ कुमारौ सौमित्रे गृहीत्वा पश्चिमां दिशं तत्र मल्लान् विनिर्जित्य दुष्टान् सर्वोपकारिणः ५ अंगदश्चित्रकेतुश्च महासत्वपराक्रमौ। द्वयोर्द्वे नगरे कृत्वा गत्वा च धनरत्नके ६ अभिषिच्य सुतौ तत्र शीघ्रमागच्छ मा पुनः। रामस्याज्ञां पुरस्कृत्य गजाश्वबलवाहनः ७ गत्वा हत्वारीन् सर्वान् स्थापयित्वा कुमारकौ। सौमित्रिः पुनरागत्य रामसेवापरोभवत् ८ ततस्तु काले महति प्रयाते रामं सदा धर्मपथे स्थितं हरिं। द्रष्टुं समागाद्दषिवेषधारी कालस्ततो लक्ष्मणमित्युवाच ९ निवेदयस्वातिबलस्य दूतं मां द्रष्टुकामं पुरुषोत्तमाय। रामाय विज्ञापनमस्तित्तस्य महर्षिमुख्यस्य चिराय धीमन् १० तस्य तद्वचनं श्रुत्वा सौमित्रिस्त्वरयान्वितः आचचक्षे यरामाय तापसं संप्राप्तं तपोधनं ११ एवं ब्रुवंतं प्रोवाच लक्ष्मणं राघवो वचः शीघ्रं प्रवेशयतां तात मुनिः सत्कारपूर्वकं १२ लक्ष्मणस्तु तपोतुल्यं प्रावेशयत्तं तापसं स्वतेजसा ज्वलंतं तं घृतसिक्तं यथानलं १३ सोभिगम्य रघुश्रेष्ठं दीप्यमानः समागमनानंतरं ९ अतिबलस्य महर्षिमुख्यस्य दूतं रामेद्रष्टुकामं पुरुषोत्तमाय रामाय पश्चिवेदयस्व तस्य महर्षेः तपस्य महर्षिमुख्यस्य रामाय चिराय विज्ञापनमस्ति रामं प्रति चिरकालं वो धनी यं वा वक्तव्यमस्ति १० तत् सौमित्रिरित्यः ११ १२ १३ वर्धस्व तस्य
रामाधिकस्वर्गराज्यलाभे नवधस्वेति तद्रूपस्थितो ...ः १४

तेनानामयं पृष्टो राम उवाच तस्मै अनामयं पृष्ट्वा प्रोवाच सत्तमः १५ यदर्थं प्राप्तः प्रागतस्तत्ते स्वामि वाक्यं १६ एकमेव रहस्यमेव अनालक्ष्यं तत्तो
येनेति शेषः १७ तदेव रहस्यमाह यतिनान्येनेति निरीक्षितः कथयेत्तावावामिति शेषः १८ अत्र रहः रहस्याने जन आवाभ्यामतिरिक्तस्तत्ती यो जनस्त

तस्मै स मुनये रामः पूजां कृत्वा यथाविधि । पृष्ट्वानामयमव्यग्रो रामः पृष्टोऽथ तेन सः १५ दिव्यासने समासीनो रामः प्रोवाच तापसं । य
दर्थमागतोऽसि त्वमिह तत्प्रार्थयस्व मे १६ वाक्येन चोदितस्तेन रामेणाह मुनिर्वचः । एकमेव प्रयोक्तव्यमनालक्ष्यं तु नः वचः १७ नान्येनैवे
तच्छ्रोतव्यं नाख्यातव्यं च कस्यचित् । शृणुयाद्वा निरीक्षेद्वा यः स वध्यस्त्वया प्रभो १८ तथेति च प्रतिज्ञाय रामो लक्ष्मणमब्रवीत् । ति
ष्ठ त्वं द्वारि सौमित्रे नायात्वत्र जनो रहः १९ यद्यागच्छति को वापि स वध्यो मे न संशयः । ततः प्राह मुनिं रामो येन वा त्वं विसर्जितः २०
यत्ते मनीषितं वाक्यं तद्वदस्व ममाग्रतः । ततः प्राह मुनिर्वाक्यं शृणु राम यथातथं २१ ब्रह्मणा प्रेषितोऽस्मीश कार्यार्थं तेन कं प्रभो
। अहं हि पूर्वजो देव तव पुत्रः परंतप २२ मायासंगमजो वीर कालः सर्वहरः स्मृतः । ब्रह्मा त्वामाह भगवान्सर्वदेवर्षिपूजितः २३
रक्षितुं स्वर्गलोकस्य समयस्ते महामते । पुरा त्वमेक एवासील्लोकान्संहृत्य मायया २४ भार्यया सहितस्त्वं मामादौ पुत्रमजीजनः ।
तथा भोगवतं नागमनंतमुरगेशयं २५

र्थः १९ को वापि त्वं वा अन्यो वा येन वा येन त्वं विसर्जितः प्रेषितस्तस्य वा मनीषितं अथवा ते तवैव मनीषितं यद्वाक्यं तद्वदस्व २० यथातथं
तत्त्वमित्यर्थः २१ त्वं क इति जिज्ञासायां संभाव्य स्वयमेवोत्तरमाह अहं हीति पूर्वजः सर्वसृष्ट्यपेक्षया पूर्वः महत्तत्वस्येश्वराय मंशाद्विशेषात्प्रादु
अतिरिक्तमेवेदं न त्वमिति शेषः २२ मायासंगमस्तस्याः सकाशाज्जातः २३ अथ ब्रह्मवाक्यमाह रक्षितुमिति समयः अवतारसमये कृतः कालः
एतावंतं कालं मर्त्यलोके स्थित्वा पुनः स्वर्गमागते त्वयि स्वरूपेण नु मम स्वर्गलोकः संबंधः स्यादिति शंकां निवर्तयितुं पूर्वकथामाह पुरेति सदेव सोम्येदमग्र
आसीदिति श्रुतेः मायाधिकार्माश्रयत्वात्त्वया ह मेऽरेनेव तरेति भावः २४ भार्यया मायया मय्या भव सानिध्येन तस्या एव परिणामशीलत्वा
दिति भावः भोगवतं शेषनुभाव आर्षः एतावुभावपि महत्तत्वाधिष्ठातारौ विस्पष्टः २५

ससखौ स पराक्रमौ तन्मे दोस्थिसंचयं तद्रूपं २६ १ मामेदिनी निर्मितवानिशेषः तत्र सुमस्यनाभ्यां विद्यमाने पमेमामुत्साद्य २७ नेवमासनाथसं
विधायभवान् मपि सर्वं प्रजोत्पादन पाले नाऽदिभारन्यवेदयत । स्थापितवान् स पुत्रसंभारः आगाहूतमनोत्सारतादि अवहारः २८ मेवीर्या पहा
रिणः मेवीर्यस्य महानादः स्वदारत्यर्थः ततः मां प्रतिनियाम निहितो नो जरमिसर्थः २९ ३० ३१ समयं वासकालप्रतिहाम नोरथः प्रतिहावि

अ० ३ मायया जनयित्वा त्वं द्वौ ससखौ महाबलौ । मधुकैटभकौ दैत्यौ हत्वा मेदोऽस्थिसंचयं २६ १ मां पर्वतसंवृतां मेदिनीं पुरुषर्षभ पद्मे दिव्यार्कसंका
शे नाभ्यामुत्पाद्य मामपि २७ मां विधाय प्रजाध्यक्षमपि सर्वं न्यवेदयत् । सोऽहं सं पुत्रसंभारस्त्वामवोचं जगत्पते २८ रक्षां विधत्स्व भूते
३० भ्यो ये मे वीर्यापहारिणः ततस्त्वं कश्यपाज्जातो विष्णुर्वामनरूपधृक् २९ त्वं तवानसि भूभारं वधाद्भस्योगरणस्य च । सर्वा लक्ष्म्या ये मा
णा सुप्रजाः सुधारणीधर ३० एवं रणस्य वधाकांक्षी मर्त्यलोकमुपागतः १ शावर्षसहस्राणि १ शावर्षशतानि च ३१ कृत्वा वासस्य समय
यं त्रिदशेशात्मनः पुरा । सते मनोरथः पूर्णः पूर्णो चापुषितेन तु ३२ कालस्तापसरूपेण त्वत्समीपमुपागमं । ततो भूयश्च ते बुद्धिर्य
दि तेगमने बुद्धिर्देवलोके जितेन्द्रिय ३४ सनाथा विष्णुना देवा भवन्तु
दिरण्यमुपासितं ३३ तत्तथा भव भद्रं ते एवमाह पितामहः । यदि ते गमने बुद्धिर्देवलोकं जितेन्द्रिय ३४ सनाथा विष्णुना देवा भवंतु
विगतज्वराः । चतुर्मुखस्य तद्वाक्यं श्रुत्वा कालेन भाषितं ३५ हसन्नरामस्तदा वाक्यं कृत्स्नस्यांतकमब्रवीत् श्रुतं तव वचो मे घमनापी
हतरं तु तम ३६ संतोषः परमोऽत्रैव त्वदागमनकारणात् त्रयाणामपि लोकानां कार्यार्थं मम संभवः ३७
यः कालः नृषु नरलोके । आयुषि पूर्णोऽसि २२ अहं कालस्तापसरूपेण त्वत्समीपमुपागमनप्रयोजनमस्मि ३३ तत्तथा भवतामुपा
स्वे सर्थः ३४ ३५ कृत्स्नस्य जगतोऽन्तकं नाशकं कालमित्यर्थः ३६ कार्यार्थसंभवः तेन निष्पन्नकार्यस्माद्वस्थानेन प्रयोजनमित्यर्थः ३७

मनोरथः अथमेमनोरथोपरितोगमनमितिभावः ३८ स्यातव्यंतद्दर्शनोपोद्घातेनभाव्यामे। प्रयेत्यनेनसर्वमिदंमायैवेतिध्वनयति ३९ आ
दतंयथाभवतितथादर्शनेनेच्छयाराद्वारमभ्यगात् ४० ४१ रामेणकार्यंकिंतेइतितत्सर्वकार्यमहंस्पादयामीतिवः तदेवाहकिंतेदत्यादि ४२

भद्रं तेलक्ष्मणगमिष्यामि [illegible] यत एवाहमागतः मनोरथस्तुसंप्राप्तोनमेत्रास्तिविचारणा ३८ मत्सेवकानां देवानां सर्वकार्येषुवैमयास्यात
व्यं मायया पुत्र यथा चाहं प्रजापतिः ३९ एवं तयोः कथयतोर्दुर्वासामुनिरभ्यगात्। राजद्वारं राघवस्य दर्शनार्थे स्पयादतं ४० मुनिर्लक्ष्म
णमासाद्य दुर्वासावाक्यमब्रवीत्। शीघ्रं दर्शय रामं मे कार्यं मस्संतमाहितं ४१ तच्छ्रुत्वा प्राह सौमित्रिर्मुनिज्वलनतेजसं। रामेणकार्यं
किंते च किं तेऽभीष्टं करोम्यहं ४२ रामाकार्यान्तरे व्यग्रो मुहूर्तं संप्रतीक्ष्यतां। तच्छ्रुत्वा क्रोधसंतप्तो मुनिः सौमित्रिमब्रवीत् ४३ अस्मि
न्क्षणे तु सौमित्रे न दर्शयसि चेद्विभुं। रामं सविषयं वंशं भस्मीकुर्यां न संशयः ४४ श्रुत्वा तद्वचनं घोरं क्रोधेर्दुर्वाससोभृशं। स्वरूपं तस्य
वाक्यस्य चिंतयित्वा स लक्ष्मणः ४५ सर्वनाशाद्वरं मेघनाशो ह्येकस्य कारणात्। निश्चित्यैवेन नोगत्वा रामाय प्राह लक्ष्मणः ४६ सौमि
त्रेर्वचनं श्रुत्वा रामः कालं व्यसर्जयत्। शीघ्रं निर्गम्य रामो पि ददर्शात्रेः सुतं मुनिं ४७ रामो भिवाद्य संप्रीतो मुनिं पप्रच्छ सादरं। किं का
र्यं ते करोमीति मुनिमाह रघूत्तमः ४८ तच्छ्रुत्वा रामवचनं दुर्वासा राममब्रवीत्। अद्यवर्षसहस्राणामुपवाससमापने ४९ अतो भो

जनमिच्छामि सिद्धं यत्ते रघूत्तम। रामो मुनिवचः श्रुत्वा संतोषेण समन्वितः ५०

४३ वशो दयास्यस्येति शेषः तेनसर्वे याभवदारिनां नाशं करिष्यामीत्यर्थः ४४ भृशं मतिशयेनघोरमित्यन्वयः स्वरूपं वाच्यंगंयंचार्थ ४५
कारणात्दुर्वाससोरूपात् ४६ ४७ ४८ वर्षसहस्राणांसंवधीयउपवासस्तस्यसमापनेसमासआर्षः ४९ यात्सिद्धं गरहेस्तितद्भोक्तुमि
च्छामि ५०

अप्रतममवस्त्वाड ५१ कालेनभाषितामित्यन्वयः स्मृत्वाच शोकादिमुक्तः सन् ५२ मनसाहृतप्रार्थितात्वाप्रतिज्ञाया अन्यथाकर्तुमशक्य
त्वादितिभावः ५३ ५४ स्नेहकृतंवधनं गर्हितंनिंदंतस्नेहाद्धेः शक्रुतरंकरणेचप्रतिज्ञाहानिरितिचिंतयंतं ५५ पूर्वमेवेदृशीतिरदमवश्यभवी

अ० ३
३१

संसिद्धमन्नंमुनयेयथावत्समुपाहरत्। [म] मुनिर्भुक्त्वान्नममतंसंतुष्टः पुनरभ्यगात् ५१ स्वमाश्रमंगतेतस्मिन्रामः सस्मारभाषितं काले
नशोकदुःखार्त्तोविमनाश्चातिविह्वलः ५२ अवाङ्मुखोदीनमनानशशाकाभिभाषितुं। मनसालक्ष्मणंतात्वाहृतमापरंघूद्वहः
५३ अवाङ्मुखोवभूवाथलक्ष्मीमेवाविलेक्षणः। ततोरामंविलोक्याहसौमित्रिर्दुःखसंप्लुतं ५४ तूष्णींभूतंचिंतयंतंगर्हितंस्नेहवं
धनं मत्कृतेमाजसंतापंनहिमांरघुनंदन ५५ गतिःकालस्यकलिताप्रवर्मेवेदृशीप्रभो। त्वयिहीनप्रतिज्ञेतुनरकोमेध्रुवंभवेत् ५६

प

मापिप्रीतिर्यदिभवेंधनुग्राह्यतातव। त्यक्त्वाशंकांजहिप्रातमांमाधर्मंत्यजप्रभो ५७ सौमित्रिणैवंकथितं श्रुत्वारामः स्खलितमानसः
श्रीह्रूयमंत्रिणः सर्वान्वसिष्ठंचेदमब्रवीत् ५८ मुनेरागमनंयत्तुकालस्यापिहिभाषितं। प्रतिज्ञामात्मनश्चैवसर्वमावेदयत्प्रभुः
५९ श्रुत्वारामस्यवचनंमंत्रिणःसपुरोहिताः ऊचुःप्रांजलयःसर्वेराममरिंदमंकाहितं ६० पूर्वमेवहिनिर्दिष्टंतवभूभारहारि
णः लक्ष्मणेनवियोगस्तेज्ञातोविज्ञानचक्षुषा ६१

तिभावः मत्कृतेत्वत्प्रतिज्ञाहानौममापिनरकः इत्यर्थः ५६ धर्ममासजेत्यन्वयः अनेनप्रतिज्ञापालनमेवक्षत्रियस्यमुख्योधर्मस्तद्विधेया
नाचप्रतिज्ञानिर्वाहणंपरमोधर्मइतिसूचितं ५७ स्खलितमानसस्त्यक्तभ्रांतस्नेहः ५८ मुनेर्दुर्वाससः ५९ ६० भूभारहारिणस्तावन्मात्रफल
लकृतयाधृतशरीरस्यतवपूर्वत्वत्तः पूर्वमित्यर्थः लक्ष्मणागमनंनिर्दिष्टं भाविसत्वयोस्याभिज्ञानएवास्ते ६१

।प्रतिज्ञाते त्वं परित्यक्ते न्यथा कृतेः ६२ धर्मेण नष्टेन एनो धर्मेण नष्टे इत्यर्थः तर्हि त्रैलोक्यपालकेन त्वद्धर्मनाशे सति त्रैलोक्यनाशः इति भावः
६३ ६४ समाश्रयस्व वसिष्ठादिवाक्यं श्रुत्वेत्यर्थः ६५ सतामुभयसममवेत्यन्वयः उक्तमुक्तवत इत्यर्थः ६६ ६७ नवद्वाराणि चक्षुषी कर्णौ
नासिका मुखं पायूपस्थे ब्रह्मरंध्रं चेति ६८ अभ्यचिंतयत वासुदेवोहमित्यध्यायत ६९ तुष्टुवुः पुष्पैः समाकिरन् विबुधैः केश्चिदस्य

प्रतिज्ञाते परित्यक्ते धर्मो भवति निष्फलः ६२ धर्मे नष्टे विलीनं त्रैलोक्यं नश्यति ध्रु
त्यजता मुलक्ष्मणं राम मा प्रतिज्ञां त्यज प्रभो। प्रतिज्ञाते परित्यक्ते धर्मो भवति निष्फलः ६२ धर्मे नष्टे विलीनं त्रैलोक्यं नश्यति ध्रु
वं। तु त्वं सर्वस्य लोकस्य पालको सि रघूत्तम ६३ त्यक्त्वा लक्ष्मणमेवैकं त्रैलोक्यं त्रातुमर्हसि। रामो धर्मार्थसहितं वाक्यं तेषां मनी
षिणां ६४ सभामध्ये समाश्रुत्य प्राह सौमित्रिमंजसा। विसृजे त्वां गच्छ सौमित्रे माभूद्धर्मस्य संक्षयः ६५ परित्यागो वधो वापि स
तां मेवोभयं समं एवमुक्ते रघुश्रेष्ठे दुःखव्याकुलितेक्षणः ६६ रामं प्रणम्य सौमित्रिः शीघ्रं गृहमगात्स्वकं। ततो गत्वा सरयूतीरमा
चम्य सकृतांजलिः ६७ नवद्वाराणि संयम्य मूर्ध्नि प्राणमधारयत्। परस्सरं परं ब्रह्म वासुदेवाख्यमव्ययं ६८ परं तत्परमं धामचेत
सा सोभ्यचिंतयत्। वायुरोधेन संयुक्तं सर्वे देवाः सहर्षयः ६९ साग्नयो लक्ष्मणं पुष्पैस्तुष्टुवुः समवाकिरन्। अदृश्यं विबुधैः केश्चि
त्सशरीरं सवासवः ७० गृहीत्वा लक्ष्मणं शक्रः स्वर्गलोकमथागमत्। ततो विष्णोश्चतुर्भागं गतं देवं सुरसत्तमाः सर्वे देवर्षयो दृष्ट्वा लक्ष्म
णं समपूजयन् ७१ लक्ष्मणोपि दिवं गत्वा रेहे सिद्धलोकगतयोगिनस्तदा। ब्रह्मणा सह समागम्य मुमुदुः दृष्ट्वा माहितमहाहिरूपकं ७२

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकांडे अष्टमसर्गः ८

केरपि देवैर्न दृश्यमित्यर्थः ७० ७१ रेरे हर्षं शेषं सिद्धलोकगतयोगिनः तल्लोकस्थयोगिन इत्यर्थः आदिहिर्नामानं महाहिरूपं येन ततस्तदुग्धं यया
दधिमावमापद्यते तथाप्यमेव रेहस्तत्राहिरूपतां प्राप्त इत्यर्थः ७२ इति श्रीमत्सकलराजविपरुद्धरणसमर्थेत्यादिविरुदावलीविराजमान
स्यहिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतावध्यात्मरामायणसेतौ उत्तरकांडे अष्टमः ८

नैगमाः वणिजः १ अघ चाहं अद्यैव अहमित्यर्थः पदानुगः पदान्यनुलक्षीकृत्य गंता। अन्यथा तेन बहु अवधानं स्यादित्यर्थः २ उक्त्वेव
क्व मिमाति ३ भरतो वापि भरत आपीत्यर्थः राज्यं गर्हयामास। तन्निंदापूर्वकमिदं आह चेत्यर्थः ४ सत्येन शपेयं सत्यं मेन शपनुपदि राज्या

श्र· ३·
१२·

लक्ष्मणानुपरि त्यन्यरामो दुःखसमान्वितः मं त्रिणो नैगमांश्चैव वसिष्ठं चेदमब्रवीत् १ अभिषेक्ष्या भिभरतमधिराज्ये महामतिं।
अघ चाहं गमिष्यामि लक्ष्मणस्य पदानुगः २ एवमुक्ते रघुश्रेष्ठे पौरजानपदास्तदा। द्रुमा इव छिन्नमूलाः दुःखार्ताः पतिता भु
वि ३ मूर्छितो भरतो वापि श्रुत्वा रामाभिभाषितं। गर्हयामास राज्यं स माहेदं रामसन्निधौ ४ सत्येन च शपे नाहं त्वां विना दिवि
वा भुवि। कांक्षे राज्यं रघुश्रेष्ठ शपे त्वत्पादयोः प्रभोः ५ इमौ कुशलवौ राजन् अभिषिंच स्वराघव। कोशलाधां कुशंवीरमुत्तरे
धुलवं तथा ६ गच्छंतु द्रुतास्त्वरितं शत्रुघ्नान यतामहि। अस्माकमेतद्गमनं स्ववासाय प्ररोचनुसः ७ भरतेनोदितं श्रुत्वा पति
तांस्ताः समीक्ष्यतं। प्रजाश्च भयसंविग्नाः सरामविश्लेषकातराः ८ वसिष्ठो भगवान् राममुवाच सदयं वचः। पश्य तातादरात्सर्वाः
पतिता भूतले प्रजाः ९ तासां भावानुगं राम प्रसादं कर्तुमर्हसि। श्रुत्वा वसिष्ठवचनं ज्ञाः समुत्थाप्य प्रत्यव १० सत्त्वेहीरघुनाथ स्ताः स्त्री
किं करोमीति चाब्रवीत्। ततः प्रांजलयः प्रोचुः प्रजाभर्तारघूद्वहं ११ गंतुमिच्छति यत्र त्वमनुगच्छामहे वयं। अस्माकमेषा परमा
प्रीतिर्धर्मो यमक्षयः तवानुगमने राम तद्गतानो हृदामतिः पुत्रदारादिभिः सार्धमनुयामो वसर्वे १२ १३ था

कौसल्येकः शायथः त्वत्पादयोः स्पर्शेन च शपद इत्यपरः शपथः ५ नहि सर्वगमले कोराज्यं पालयिष्यतीत्याशंक्याह इमाविति ६
तत्तथा कठोरं वदंतं भरते पतितामुवीति शेषः ८ तानेतिसं वोधन ९ भावनुगं अभिप्रायानुगं प्रत्येतिल्प ववार्षः ११ १२ अयं त्वदनु
गमनरूपः १३

तपोवनाद्यन्यतमं यद् गन्तासि तत्तनुयामहस्त्वर्थः १४ १५ १६ कृच्छ्रेणाभगवद्वियोगात्... नासहिष्णुतया क्लेशेन १७ १८ अत्रिपुत्रस्य दुर्वास

तपोवनं वा स्वर्गं वा पुरं वा रघुनंदन। ता वा तेषां मनोद्राघ्यं कालस्य वचनं तथा १४ भक्तपौरजनं चैव वा द्विमित्याह राघवः कृत्वैवं
निश्चयं रामस्तस्मिन्नेवाह्नि प्रभुः १५ प्रस्थापयामास च तौ रामभद्रः कुशीलवौ अष्टौ रथसहस्राणि सहस्रं चैव दंतिनां। पत्तीनां
चाश्वसहस्राणामेकैकस्मै ददौ बलं १६ बहुरत्नौ बहुधनौ स्वपुष्टजनावृतौ। अभिवाद्य गतौ रामं कृच्छ्रेण तु कुशीलवौ १७ शत्रुघ्ना
नयने दूतान्प्रेषयामास राघवः ते दूतास्त्वरितं गत्वा शत्रुघ्नायान्यवेदयन् १८ कालस्यागमनं पश्चादत्रिपुत्रस्य चेष्टितं। लक्ष्मणस्य
च निर्याणं प्रतिज्ञां राघवस्य च १९ पुत्राभिषेचनं चैव सर्वेषामचिकीर्षितं। श्रुत्वा तत् दूतवचनं शत्रुघ्नः कुलनाशनं २० व्यथितो
पि धृतिं लब्ध्वा पुत्रावाहूय सत्वरः अभिषिच्य सुबाहुं वै मथुरायां महाबलः २१ यूपकेतुं च विदिशानगरे शत्रुसूदनः। अयोध्यां त्व
रितं प्रागात्स्वयं रामदिदृक्षया २२ ददर्श च महात्मानं तेजसा ज्वलनप्रभं। दुकूलयुगसंवीतं ऋषिभिश्चाक्षयैर्वृतं २३ अभिवाद्य रमा
नाथं शत्रुघ्नो रघुपुंगवं। प्रांजलिर्धर्मसहितं वाक्यं प्राह महामतिः २४ अभिषिच्य सुतौ तत्र [illegible] जीवलोचन। त्वया तु गमने रा
जन् विद्धि मां कृतनिश्चयं २५ त्यक्तुं नार्हसि मां वीर भक्तं च विशेषतः शत्रुघ्नस्य ददौ बुद्धिं विज्ञाय रघुनंदनः २६ सज्जीभवतु मध्याह्ने
भवानिसप्रवद्धिवः अथ सुग्रीवप्रमुखास्तेतुर्वानराः कामरूपिणः २७ ऋक्षाश्च राक्षसाश्चैव गोपुच्छाश्च सहस्रशः ऋषीणां देवतानां
च पुत्राणामस्य निर्गमे २८

सः प्रतिज्ञां मज्जास्य सहनयनविषयां १९ चिकीर्षितं स्वर्गमनरूपं कुलस्य भ्रातसम्बंधस्य नाशनं २० २१ २२ अक्षयैः ऋषिभिः अजिवि
द्गीविभिर्वसिष्ठाद्यैः २३ २४ २५ २६ २७ २८

नवभार्नरराक्षेस्यः॥

२९ ३० ३१ ३२ मेवचनात्मनाः प्रशाधि एष संरक्षः संबाधिएष्यंच प्रशाधि अतोन्यन्मावदे साह शापितोसीति अन्यवचनोक्तौ मद्वध पातकं नवेतिभावः ३३ ३४ ममाज्ञो चिरंजीवे त्वेवं रूपो द्वापराणंतरे एतच्चतुर्युगी भिन्नयाः किंचिच्चतुर्युग्यंतर्गत द्वापरे ३५ युद्धं भवेत भविष्यतीतितनः

श्री · उ· ४९ तस्मिन्नंतरेण मंसुग्रीवोपि महाबलः यथावद्भिवाघाहराव भक्तवत्सलं ३० अभिषिच्यो मरं रामे आगतोस्मि महाबलं। नवानुग

३३ मनेणमविद्धि मां कृतनिश्चयं ३१ कृत्वानेषां ह्रदं वाक्यं ऋक्षवानर राक्षसां। विभीषणमुवाचेदं वचनेमरदुसाररं ३२ धरिष्यति धरण्या वत प्रजास्तावत्प्रशाधि मे वचनाद्रक्षसंराज्यं शापितो सि ममोपरि ३३ नाकिंचिदुत्तरं वाच्यं त्वया मत्प्रियकारणात। एवं विभीष णं नत्वा हनूमंतमथाब्रवीत ३४ मारुते त्वं चिरंजीव मम माज्ञां माम सा कृथाः जांबवंतमथप्राह त्वं छलं द्वापरांतरे ३५ मयासा धंमवेयुद्धं यत्किंचित्कारणांतरे। ततस्तान् राघवः प्राह ऋक्षराक्षसवानरान ३६ सर्वान्नेव मयासार्धं प्रयातेति रयान्वितः तत्त्व-

धंमवेयुद्धं यत्किंचित्कारणांतरे। ततस्तान् राघवः प्राह ऋक्षराक्षसवानरान ३६ सर्वान्नेवमयासार्धं प्रयातेति रयान्वितः ततः- ततः प्रभाते रघुवंशनाथो विशालवक्षाः सितकंजनेत्रः पुरोधसं प्राह वसिष्ठमार्यं मोत्त्वग्निहोत्राणि पुरो गुरो मे ३७ ततो वसिष्ठे पिचकार सर्वं प्रास्थानिकं कर्म महद्विधानात्। क्षौमांबरो दर्भपवित्रपाणिर्महाप्रयाणाय गृहीतबुद्धिः ३८ निष्क्रम्य राम नगरात्सि तात्म्राक्षशीवपातः शशिकोटिकांतिः रामस्य सव्येसितपद्महस्ता पद्मागता पद्मविशालनेत्रा ३९ पार्श्वेच पद्मेन हृता कंजहस्ताश्या मापयोम्भूराप्रदीप्यमाना। शास्त्राणि शास्त्राणि धनुश्च बाणान्नग्मुः पुरस्ताद्धृतविग्रहास्ते ४०

स्वर्गं गमिष्यसीति शेषः अत्रनावबत ग्रहणं मेरद्धिविरह्योरप्युपलक्षणं तान् हनूमज्जांबवदादिभिन्नान् ३६ ३७ प्रास्थानिकमहाप्रस्था नोचितं क्षौमांबरत्वादिरूप मविशेषणं ३८ पद्मालक्ष्मीः स्वर्गगनापि सीतात्वा लेलक्ष्मीरूपेण सेनिहिता जातेत्यर्थः ३९ अरुणकंजहस्ता रक्तपद्महस्ता भूस्तरधिष्ठात्री देवता एवमग्रेपि बोध्यं ४०

रिव्यामुनयः सनकादयः श्रीतीनां मातायत्री ४१ अनाहतद्वारापवर्गतुल्यं व्रजंतं रामममन्वयपुः ४२ अनुयायात अन्वगच्छदित्सर्थः क
चित्तथैवपादः ४३ सामान्यवर्यार्गाः समत्रिरगोछिन्नाय्यायपुः क्षत्रमुखाः क्षत्रे क्षत्रिया मुखे मुख्या अग्नेसरा येषां ताः दृशा वैश्यदयः ४४

वेदाश्च सर्वे धृतविग्रहाश्च ययुश्च सर्वे मुनयश्च दिव्याः। माता श्रुतीनां प्रणवेन सार्धं गीयं ययौ हरिव्याहृतिभिः समेता ४१ गच्छंतमेवा
नुगतां जनास्ते सपुत्रदाराः सहबंधुवर्गैः अनावृतद्वारमिवापवर्गं रामं व्रजंतं ययुरात्मकामाः ४२ सांतःपुरः सानुचरः सभार्यः शत्रु
घ्नयुक्तो भरतोनुयायात। गच्छंतमालोक्य रमासमेतं श्रीराघवं पौरजनाः समस्ताः ४३ सबालवृद्धास्तु पपुर्द्विजाग्र्याः सामान्यव
र्गाश्च समं त्रिरागोययुः। सर्वे गताः क्षत्रमुखाः प्रहृष्टा वैश्याश्च शूद्राश्च तथापरे च ४४ सुग्रीवमुख्या हरिपुंगवाश्च ऋक्षास्तथा विशुद्धा
शुभशब्दमुक्ताः नकश्चिदासीद्दुःखयुक्तो दीनोथवा बाल्यसुखेषु सक्तः ४५ आनंदरूपानुगता विरक्ताय युश्च रामं पशुभस्सबंधैः
भूतान्यदृश्यानि च यानि तत्र ये प्राणिनस्थावरजंगमाश्च ४६ साक्षात्परात्मानमनंतशक्तिं जग्मुर्विरक्ताः परमेकमीशं। नासीदयोध्या
नगरे तु जंतुः कश्चित्तदा राममनानयातः ४७ शून्यं बभूवाखिलमेव तत्र पुरं गते राजनि रामचंद्रे। ततो निदूरं नगरात्सगत्वा ददर्श नंदीं तां ह
रिनेत्रजातां ४८ ननंद रामः स्मृतपावनीतोरद्रश्च यशेषमिदं तदृस्यं। अथागतस्तत्र पितामहो महान् देवाश्च सर्वे ऋषयश्च सिद्धाः ४९

दुःखवाल्यसुखयोगाभावे हेतुः आनंदरूपानुगताः आनंदरूपं रामम् अनुगताः तदनुगमनात्। तदानंदरूपप्राप्ति गासासात्तद्योगः सर्वत्र वैराग्यं वे
तिभावः ४६ जग्मुरनुजग्मुः यो राममनाराममनयातो नानुयातस्तादृशो जंतुर्नासीदित्सर्थः ४७ राजनिगते खिलं पुरं शून्यं बभूव हरिनेत्र
जाता शरयू ४८ स्मृतं पावनं विराड्रूपमात्मनो येन सः। अशेषमिदं जगत् तद्दृस्यं ददर्श आत्मानं विराड्रूपस्मृतवानित्सर्थः ४९

अपारपारं अवधिरूपपारद्वयहीनं तादृशमपि विमानावृतमासीत् । ज्योतिर्मयेन रत्नगणप्रचुरमिव ५० ये त्रैलोक्ये पुण्यपंक्त्या स्वर्गे सर्वेभ्य
आधिक्यं प्राप्तास्ते अंबुनभः समावृतं चोपादपूरयन् ५१ परिक्रामत् पर्यक्रामत् जलोपर्यगच्छदित्यर्थः तत्र वहेतु गर्भविशेषरामनंतशक्ति
रिति ५२ हे परात्मन् यमिपुर इन जगतः सृष्टिस्थितिकर्त्ता त्वमेवेत्यर्थः त्वमेशं एकं निर्जितं त्वं ब्रह्मरूपं जानासि ५३ नन्वेवं ब्रह्मा तस्य ब्रह्मरूप

अ॰ ३

३४

विमानकोटीभिरपारपारं समावृतं खं सुरसेविताभिः रविप्रकाशाभिरभिस्फुरन्नवं ज्योतिर्मयं तत्र नभो बभूव ५० स्वपुण्यप्रकाशैर्म
हृतां महद्भिः समाहृतं पुण्यफलं तावदिष्टैः ववुश्च वाता स्वसुगंधवंतो ववर्ष वृष्टिः कुसुमावलीनां ५१ उपस्थितैरेव मरुद्गणैर्गेयगायत्स
विद्याधरकिंनरेषु गणमस्तकपद्मानां सरपज्जलं सस्पृहयापरिक्रामदनंतशक्तिः ५२ ब्रह्मा तदा प्राह कृतांजलिस्तं एवं परात्मन् परमे
श्वरस्त्वं । विष्णुः सदानंदमयोसि पूर्णो ज्ञानासि तत्त्वं निर्जनमेशमेकं ५३ तथापि दासस्य ममाखिलेश कृतं च बोभक्तपरोसि वि
ह्वन । त्वं मत्तोभिर्वै स्ववमेकमाद्यं प्रविश्य देहं परिपाहि देवान् ५४ यद्वापरो वाय दिरोचते तं प्रविश्य देहं परिपाहि नस्त्वं । त्वमेव दे
वाधिपतिश्च विष्णुर्जानंति न त्वां पुरुषा विना मां ५५ सहस्रकृत्वस्तु नमो नमस्ते प्रसीद देवेश पुनर्नमस्ते । पितामह प्रार्थनया स
सरामः पश्यत्सु देवेषु महाप्रकाशः ५६ मुहुर्मुहुश्च चक्षुः विदिवौकसां तदा बभूव चक्राद्युत अश्चतुर्भुजः शेषो बभूवेश्वर तल्पभू
तः सौमित्रिरमत्कृतभोगधारी ५७

न

स्वकमशरीरपरिग्रहो न आहत यापीति भक्तानुग्रहार्थं मायया सर्वमिदं कृतमिति भावः अतो वै स्ववं देहं प्रविश्य देवान् पाहि रक्ष ५४
परिदिति परत्वर्थः अथवायोपरो देहस्तवरोचते तं वा प्रमरेहं एवं तत्प्राभृतो जातः अत्र विश्यपाहि एवं विष्णुरूपं त्वां मां विना अन्ये पु
रुषा न जानंति ५५ एवं विष्णुस्वरूपता त्वात्मन्या प्रणमति सहस्रेति ५६ चक्षूंषि मुहुर्मुहुः सर्वं प्रभयेति शेषः एवं देहं एवं तत्प्राभृतो ना
तः अनेन विष्णुर्देहं एवं मायया द्विभुजत्वं वैशिष्ट्येन लोकदृग्गोचर आसीदिति सर्वच्चिदं भोगसर्पशरीरं पूर्वं गतो यस्ततः स्मिन्नवसरे ते
देहे न्यसिहितः ५६

रः शंखः लवणांतकः शत्रुघ्नः सीता च पुरैव लक्ष्मीरूपाऽभवत् सा पितृत्वकाले लक्ष्मीरूपेण संनिहितासीदिति शेषः हि यतो रामो विष्णुरित्यर्थः
५८ स्वर्वशरीरकेण विष्णुदेहेन ५९ नन्वेवं भगवतो विष्णुरूपप्राप्त्या वैकुंठवासः स्यात्तेन वचसमाप्तवं रामायणे सर्वकालसभावर्णने यमस
भाप्रस्तावे दाशरथी रामो यमसभायां दृष्ट इति नारदेनोक्तं न विरुध्यते इति चेत् अत्र वदामः अवतारपरिग्रहस्य हि प्रयोजनद्वयं दुष्टवधेन शि
ष्टपालनं स्वाचरणेन लोकानां धर्ममर्यादाबोधनं च एतदर्थमेव तेषां तत्तत्कर्मानुष्ठाने प्रवृत्तिरन्यथा अकामस्य भगवतः किं यज्ञाद्यनुष्ठा

बभूव स शंखचक्रधरो च दिव्यो केके पिसूर्लवणांतकश्च। सीता च लक्ष्मीरभवत्पुरैव रामो हि विष्णुः पुरुषः पुराणः ५८ सहानुजः स्व
र्वशरीरकेण बभूव तेजोमयदिव्यमूर्त्तिः। विष्णुं समासाद्य सुरेंद्रमुख्या देवाश्च सिद्धा मुनयश्च यक्षाः ५९ पितामहाद्याः परितः
परीशास्तं वेर्गृणंतः परिपूजयंतः आनंदसंप्लावितपूर्णचित्ता बभूविरे प्राप्तमनोरथास्ते ६० नराह विष्णुर्द्रुहिणं महात्मा एते हि
भक्ता ममपि चानुरक्ताः यांतं दिवं मामनुयांति सर्वे तीर्यक्शरीरा अपि पुण्ययुक्ताः ६१ वैकुंठसाम्यं परमं प्रयांतु समादिश त्वाशु
ममात्मपार्श्वं। श्रुत्वा हरेर्वाक्यमथाब्रवीत्कः सांतानिकान्यांतु विचित्रभोगान् ६२

नेन एवं च धर्मबोधनार्थं तदनुष्ठानवतः आजन्मेदृशधर्मानुष्ठानस्यामुकलोकवासः फलमिति बोधयितुं दाशरथिरामत्वप्रत्यभिज्ञापकेन
मायिकेन केनचिच्छरीरेण तल्लोके वासेनास्त्येतेः रामायणे एतदर्थाक्षयमनंतु इतिहासेषु युक्तत्वात् सर्वज्ञानां लक्ष्मीकयादीनामुत्तमा विस्तर्वा
र्थज्ञानवत्वादित्यन्यत्र विस्तरः नरेति तदा तस्मिन्समये विष्णुर्द्रुहिणं ब्रह्माणमाह मदनुगमनादेव पुण्यपुण्ययुक्तत्वानुमानं ६१ वैकुंठ
साम्यं वैकुंठसमानलोकं स्वार्थे ष्यञ् चातुर्वर्ण्यादित्वात् ह्रास्व त्वा हा एतान्ममात्मपार्श्वं समादिश त्वं तादृशलोकं प्रवेशय स्व कः ब्रह्मा सांतानिका
लोकविशेषाः ६२

मरणकाल एव नतु नतः।
तेषां लोकानामुत्तमत्वमाह मही योपरि दीप्यमानान् प्रशस्तलोकाद् ऊर्ध्वं दीप्यमानान् अपि चये पिमनुष्याल मकाल एव मरणकाल एव तुनतः। तेषां लोकानां उत्तमत्वमाह यतो पवित्रनाम रामेत्येतत् गृणन्ति वदन्तितेपि तानेव लोकान् योगिः प्राप्या
प्राणपिकराचिततत्राप्यहानतो वा अहानतएव वा शब्द एवार्थे ते पवित्रनाम रामेत्येतत् गृणन्ति वदन्ति ते पि तानेव लोकान् योगिः प्राप्या
प्राणपिकरा चितत त्राप्यहानतो वा अहानत एव वा शब्द एवार्थे ... तस्मिंश्चितं ६३ ६४ योयदृशजः सतद्रूपमेव प्रापेत्यर्थः तदा प्रभाकरमिति
न भजन्तु अनेनानन्या प्यस्त योगोंतकाले त्वन्नामस्मरणं च समरतिस्मचितं

अ॰ उ॰ न भजन्तु अनेनानन्याप्यस्त योगोंतकाले त्वन्नामस्मर्त्तांच समरतिस्मचितं ६३ ६४ योयद्दृशजः सतद्रूपमेव प्रापेत्यर्थः तदा प्रभाकरमिति

लोका न्मही योपरि दीप्यमानांस्त्वद्रूपवपुष्काः कृतपुण्यपुंनाः येवापितेराम पवित्रनामगृणंति मर्त्यालयकालएव ६३ अहानतो वा
३५ लोका न्मही योपरि दीप्यमानांस्त्वद्रूपवपुष्काः कृतपुण्यपुंनाः ... ताग्नि तत्र शाह रिराक्षसाघाः सूर्य स्वाजलंत्यक्त कलेवरास्ते ६४ प्रपेदिरे प्राक्तनमेवरू
पिभजंनीलोकांस्तानेव योगैरपि चाधिगम्यान्। ततोनि तत्र शाहरिराक्षसाघाः सूर्य स्वाजलंत्यक्तकलेवरास्ते ६४ प्रपेदिरे प्राक्तनमेवरू
पिभंजनीलोकांस्तानेव योगैरपि चाधिगम्यान्। ... ६५ ततो विमग्नासरयूजले पुनराः परित्यज्य
यं यदृशजाऋक्ष हरी श्वरास्ते। प्रभाकरं प्रापहरिप्रवीरः सुग्रीव आदित्यजवीर्यवत्वात् ६५ ततो विमग्नासरयूजले पुनराः परित्यज्य
यं यदृशजा ऋक्षहरी श्वरास्ते। प्रभाकरं प्रापहरिप्रवीरः सुग्रीव आदित्यजवीर्यवत्वात् ... ६६ तिर्यंकृप्रजों अपि रामदृग्जलेप्रविष्टा दिवमेवयाताः दि
रात दिव्यदेहं आरुह्यदिव्याभरणविमानं प्रापुस्त्रैनिकाख्यलोकान् ६६ तिर्यक्प्रजों अपि रामदृग्जले प्रविष्टा दिवमेव याताः दि
व्यदेहं आरुह्य दिव्याभरणविमानं प्रापुस्त्रैनिकाख्यलोकान् ... ६७ स्मृत्वाहरिं लोकगुरुं परेशं स्वाजलं स्वर्गमवापुरंजे एतावदेवोत सा
दृश्यवोजानपदाश्च लोकारामं समालोक्य विमुक्तसंगाः ६७ स्मृत्वा हरिं लोकगुरुं परेशं ... दिने दिने पापचयं प्रकुर्व
र माह शंभुः श्रीरामचंद्रस्य कथावशेषं ६८ यः पारमप्यत्र परेत्सपापाद्विमुच्यते जन्मसहस्रजातात्। दिने दिने पापचयं प्रकुर्व
रमाह शंभुः श्रीरामचंद्रस्य कथावशेषं ६८ यः ... सर्वाघचयः प्रयातिरामस्य सालोक्यमनन्यलभ्यं। आख्यानमेतद्रघुनायकस्य कै
म नपठन्नरः श्लोकमपीह भक्त्या ६९ विमुक्तसर्वाघचयः प्रयाति रामस्य सालोक्यमनन्यलभ्यं। आख्यानमेतद्रघुनायकस्य कै
तं पुरराघवचोदितेन ७०

संतनिकाख्येसत्र्यत्यर्थः ६५ संतनिकाख्येसत्रऋक्ष आर्षः ६६ रामदृशः भवावदृष्ट्या स्त्रीरासर्व
आदित्यजवीर्यवत्वात् आदित्यहेतुजवीर्योत्पन्नत्वादित्यर्थः ६५ संतनिकाख्ये सत्र ऋक्ष आर्षः ६६ रामदृशः भवावदृष्ट्या स्त्रीरासर्व
श्रियं ... ६७ अजः शीघ्रं ६८ अयरामायणपाठफलमाह। यदति। नयापापं कुर्वन्नेवरामायणश्लोकम
पापाः विमुक्तसंगाः मृत्वा तिशेषः ६७ अजः शीघ्रं ६८ अयरामायणपाठफलमाह। यदति। न यापापं कुर्वन्नेव रामायणश्लोकम
पापाः विमुक्तसंगामृत्वा तिशेषः ६७ अजः शीघ्रं ६८ ... रामस्य सालोक्यं प्रयाति राघवचोदितेन। अन्तर्यामिविधया रघुनाथमं
पिपठन् विमुक्तसर्वपापः रामस्य सालोक्यं प्रयाति राघवचोदितेन। अन्तर्यामि विधया रघुनाथमं

अ० पु०
॥३६॥

इदमध्यात्मकं श्रुत्वा सर्वपापैः प्रमुच्यते। अपुत्रः पुत्रमाप्नोति धनधान्यसुतान्वितः॥ यं यं चिंतयते कामं तं तं प्राप्नो-
ति संशयः॥७४॥ नरो वा पुरुषो वापि शुचिः प्रयतमानसः। अध्यात्मके श्रुते धीते ब्राह्मणान्पायसा-
दिभिः। भोजयेद्भक्त्या गोस्वर्णदानतः तोषयेन्नृप॥ ब्राह्मणेषु च तुष्टेषु तुष्टाः स्युः सर्वदेवताः। ब्रह्माविष्णु-
स्तथा रुद्रः को देवगणास्तथा॥ भूतानि मुनयो देव्यस्तथा पितृगणाश्च ये॥ वाचकः पूजयेद्भक्त्या
वस्त्रान्नैः स्वर्णभूषणैः। विष्णुपुणस्तु कपिला देया वै जपपारगे॥७८॥ कांस्यदोहो रौप्यखुरा स्वर्णशृंग-
विभूषणा॥ रामस्य परितोषार्थं दद्यादेनां द्विजातये॥ व्यासनग्रहदेयं सर्वोपस्करसंयुतं॥ वा-
चकं पूजयेत्तेनानुसन्ध्येपर्कल्पभवाप्नुयात्॥ महेश्वरेणाभिहितं विश्वस्य श्रृणु तु रामं परितोषमेति॥
रामायणं काव्यमनंतमस्ति श्रीनीलकरेणाभिहितं नवान्ये॥ नतस्य पाठेष्येः शृणुयात्सपापैर्विमु-
च्यते जन्मशताद्भवेभ्यः॥८२॥ अध्यात्मरामं पठतश्च नित्यं श्रोतुश्च पश्चात् लिखितश्च रामः
॥अतिप्रसीदश्च सदा समीपे सीतासमेतः श्रियमातनोति॥८३॥ रामायणं जनमनोहरमादि-
काव्यं ब्रह्मादिभिः सुरवरैरपि पूजितं च॥ श्रद्धान्वितः शृणुयात्पठतीह नित्यं विष्णोः प्रयाति स-
दनं स विशुद्धदेहः॥ इती श्रीब्रह्मांडपुराणे अध्यात्मरामायणे उत्तरकांडे श्रीउमामहेश्वरसं-
वादे नवमः सर्गः समाप्तोयं ग्रंथः॥ शुभं भवतु॥ इदं पुस्तकं पुरुषोत्तम नट कवलमकारस्यसतं।

॥३६॥
॥५८॥

[OrderDescription]
,CREATED=14.07.20 11:29
,TRANSFERRED=2020/07/14 at 11:39:52
,PAGES=73
,TYPE=STD
,NAME=S0003308
,Book Name=M-2705-ADHYATAM RAMAYAN UTTARKAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,